
Sadananda
Shaivasudhakar
शैव सुधाकर
Sanskrit
Printed on paper
Sambat 1922
Folio: 50
13" x 4.8"
Complete





श्री जगद्गुरु विश्वाराध्य सिंहासन
ज्ञानमंदिरम्
E. 66.
जंगमवाड़ी मठ काशी

२५-६

शैवसुधाकर


॥ अथ शैवसुधाकरग्रंथः प्रारभ्यते ॥ शुभमस्तु ॥


राजा
सदानंद
शिव
पार्वती

श्रीम[illegible]शैवाचार्याः विजयेताधराम्

ग्रन्थोऽयम्

शैवसुधाकरः




श्रीसदानन्दस्वामिरचितः

= संवत १९२२, शकाब्द १७८७ आषाढकृष्ण तृतीयायां चन्द्रवासरे =

श्रीशैवसुधाकरीय विषयानुक्रमणिका,

विषयाः	विशेषाः	पृ.सं.
(१) अर्चनमाहात्म्यम्	(१) किरणे	१
(२) शिवाधिक्यकथनम्	,,	,,
(३) भस्मधारणमाहात्म्यम्	(२) ,,	२
(४) भस्मविधानम्	,,	,,
(५) रुद्राक्षधारणमाहात्म्यं -	(३) ,,	८
(६) ऊर्ध्वपुण्ड्रनिरसनम्	(४) ,,	११
(७) लिङ्गपूजनमाहात्म्यम्	(५) ,,	(१४)
(८) उपचारनिरूपणं	६ ,,	१६

विषयाः	विशेषाः	पृ.सं.
(९) जलोत्कर्षवर्णनम्	७ ,,	१८
१० अभिषेकविधानम्	८ ,,	,,
११ गन्धोत्कर्षवर्णनम्	९ ,,	,,
१२) अक्षतोत्कर्षनिरूपणम्	१० ,,	,,
१३ बिल्वादिपत्रपुष्पोत्कर्षवर्णनम्	११ ,,	१९
१४ धूपोत्कर्षवर्णनम्	१२ ,,	२२
१५ दीपोत्कर्षवर्णनम्	१३ ,,	,,
१६ नैवेद्योत्कर्ष ,,	१४ ,,	२३
[illegible]	१५ ,,	[illegible]



(१८)	प्रदक्षिणोत्कर्ष	,,	१६	,,	२४.
(१९)	नमस्कारवर्णनम्	,,	१७	,,	२५
(२०)	दिङ्नियमनिरूपणं.		१८	,,	२६
(२१)	नैवेद्यस्वीकरण	,,	१९	,,	,,
(२२)	पार्थिवपूजानि	,,	२०	,,	२८-३१
(२३)	स्त्रीशूद्रयोः पार्थिवपूजा	,,	२१	,,	३२.
(२४)	एकादशीव्रतनिरूपणम्		२२	,,	३२-
(२५)	प्रदोषव्रतनिरू	,,	२३	,,	४४-
(२६)	सोमवारव्रतनिरूपणं		२४	,,	४५.
(२७)	शिवरात्रिव्रत निरूपणं		२५	,,	४६ ,,

ग्रन्थेऽस्मिन् प्रमाणत्वेनोद्धृता ग्रन्थाः —

"(१) लिङ्गपुराण (२) शैवागम. शिवरहस्य (४) सनत्कुमारसंहिता: (५) पद्मपुराणम् (६) स्कन्दपुराणं (७) ईशानसंहिता. (८) बृहज्जाबालोपनिषद् (९) वायुसंहिता (१०) शिवगीता (११) सिद्धान्तसारः (१२) सौरपुराणं (१३) आदित्यपुराणं. (१४) ब्रह्माण्डपुराणम् (१५) बृहन्नारदोपनिषद् (१६) आदिपुराण - (१७) ब्रह्मवैवर्तपुराण. (१८) कूर्मपु. (१९) सूतसंहिता - (२०) जाबालोपनिषत् (२१) शिवपुराण (२२) शिवधर्मः - (२३) नन्दिपुराण - वराहपुराण (२५) भविष्यपुराण - (२६) रावणभाष्य - (२७) केदारखण्डः ——" इत्यादयः —

॥श्रीगणेशायनमः   यत्तत्सुखवित्तनुर्मतिगिरांयोनास्पदंमाययाजीवेशादिविभेदमाकलयवनाप्य
भूमिक्रीडनयास्वेषांस्थूलतमांशिवीस्वतनुमतिंलोकेऽवतीर्णःप्रभुर्लिङ्गात्माकरुणार्द्रधीर्विजयतांश्री
साम्बमूर्त्तिःशिवः १ क्षोणीमंडलमंडनेधनवतांप्रज्ञावतांसौख्यदे खंडच्छिन्नदखंडनेजयपुरेदंडान्नु
द्दंडयन् नीसंसंप्रतिपालयन्विनयिनःपाखंडिनःखंडयन् अस्तिश्रीनृपरामसिंहसुमतिःसंखंडितानंडया
नू॥२॥तस्यश्रीरविवंशमानससरःपद्मस्यसत्कीर्त्तिसद्गन्धाकृष्टसुधीएवीरबुधप्रपत्पासंततेर्नृपतेः॥भूदेवाम
रवन्दनीयचरणश्रीमेनकानन्दिनी॥स्वात्मानन्दनचारुचन्द्रमरणोत्तरंगितःसमस्तेश्वरे॥३॥नानाकर्मजपुण्य
बीजनवसंस्काराङ्कुराधीश्चितोजाताकल्पलतेवशैवजनसत्सङ्गात्पुसिन्धामृताम्॥संदृष्टानिजपार्श्ववू
र्त्तिजनसच्छन्मश्रुकैर्विस्तृतातज्ञेशार्चनपुण्यकीर्त्तिकरणिंविद्यापुरत्रानयत्॥४॥तज्ज्ञात्वाशिवपादपङ्कजरत
जःश्रीमानस्वरूपोनृपःश्रीमच्छार्दूलरामसिंहनृपतिश्रीस्पेक्षमाणैर्युतः॥कार्यःसंग्रहरूपवोधदप्रतस्तुष्टेर्यथा
बुध्यंश्रीमच्छैववसुधाकरोमतिमतांल्हादायसंतन्यते॥५॥अथश्रीशिवार्चनस्यधर्मार्थकाममोक्षहेतुत्वा
त्स्वस्वकारःप्रदर्श्यते॥तत्रपाराशरपुराणे॥ब्राह्मणःसर्वसिद्ध्यर्थंकुर्याच्छंकरपूजनं॥वृत्सविष्णवादिदेवानां।

पद्मापितिश्च पूजया॥२॥ अष्टैश्वर्यं चतुरत्वं च पदं गांधर्वपूर्वकं॥ सार्वभौमत्वमीशस्य पूजयैव हि सिध्यति॥२॥
मनोहराः स्त्रियः सौख्यं कल्याणं नवनानिधि॥ अपवर्गोऽपि धनं चापि पूजया शूलिनः खलु॥३॥ अश्वमेधसहस्रा
णि राजसूयशतानि च॥ महेशार्चनपुण्यस्य कलां नार्हंति षोडशीम्॥४॥ लैंगे॥ बहुनोक्तेन किं विप्र महादेवस्य
पूजनात्॥ निकृष्टोऽपि विमुच्येत संसारमहोदधेः॥१॥ सौरपुराणे॥ अप्येकदिवसं भक्त्या यः पूजयति शंकरं॥ सो
पि याति शिवस्थानं किं पुनर्बहुशोऽर्चनात्॥२॥ महाभारते॥ भित्वा भित्वा च कृत्स्नानि हत्वा सर्वमिदं जगत्॥ योय
जेति विरूपाक्षं न स पापेन लिप्यते॥१॥ वायवीयसंहितायां॥ ब्रह्मघ्नो वा सुरापो वा स्तेयी वा गुरुतल्पगः॥ मातृहा पितृहा
वापि वीरहा भ्रूणहापि वा॥ संपूज्य मंत्रकं भक्त्या शिवं परमकारणं॥ तैस्तैः पापैर्विमुच्येत त्वादि॥ पाद्मे॥ महेश्वर
कृतं सर्वं त्रैलोक्यं सचराचरं॥ ते कृतघ्ना भविष्यंति ये न भक्ता महेश्वरे इति॥२॥ भविष्यपुराणे॥ लिंगे देवो महादेवः
सर्वदेवनमस्कृतः॥ अनुग्रहाय लोकानां तस्मान्नित्यं प्रपूजयेत्॥१॥ तस्मात्सौम्य ममानूक्त्वा यावज्जीवं प्रतिज्ञया॥
अर्चयेत महादेव मापन्नोपि महामुने॥१॥ वरं प्राणपरित्यागः शिरसो वापि कर्तनं॥ न त्वसंपूज्य भुंजीत भगवंतं
त्रिलोचनं॥२॥ स्फुटं निर्वहते यस्य यावज्जीवं शिवार्चनं॥ मनुष्यचर्मणा नद्धः स रुद्रो नात्र संशयः॥३॥ नहि लिंगा

र्चनात्किंचित्पुण्यमभ्यधिकं क्वचित्॥ इतिविज्ञाययत्नेनपूजनीयःसदाशिवः॥४॥ आकाशंलिंगमित्याहुः पृथिवीतस्यपीठिका
आलयःसर्वभूतानांलयनाल्लिंगमुच्यते॥५॥ योलिंगंद्वेष्टिसंमोहात्सर्वदेवनमस्कृतं॥ नरोनरकगामीस्यात्तस्यसंभाष
णादपि॥६॥ लिंगपुराणे॥ लिंगेतुपूजितेसर्वमर्चितंस्याच्चराचरं॥ तस्मात्सदार्चनंकार्यंलिंगस्यैकमहात्मनः॥७॥ अ
नेकजन्मसाहस्रंभ्राम्यमाणःस्वकर्मभिः॥ कःसमाप्नोतिवैमुक्तिंलिंगार्चनमृतेनरः॥८॥ स्कंदपुराणे॥ मनसाचिंतयेद्य
स्तुपूजयामिहरंवरं॥ अथशक्तोनास्तिचेद्द्रव्यंयस्यचापिसुमध्यमे॥ सतथाश्रद्धयापूतोविमुक्तःसर्वपातकैः॥९॥ य
स्यतत्त्वं॥ ब्रह्मादयोपिनजानंति॥ यस्माच्चब्रह्मादयउपास्यंते॥ तस्यपूजनेनचतुर्वर्गप्राप्तिरित्यत्रकिमाश्चर्यं॥ तथाच
भागवते॥ देवान्प्रतिब्रह्मणोवाक्यम्॥ नाहंनयज्ञोनचयूयमन्येयेदेहभाजोमुनयश्चतत्त्वं॥ विदुःप्रमाणंबलवीर्ययोर्वातस्या
त्मतंत्रस्यकउपायविंदेत्॥ यज्ञोविष्णुः॥ महाभारतेदानधर्मेश्रीकृष्णवाक्यं॥ ईक्षितुंचमहादेवंनमेशक्तिरभूत्तदा॥ ततोमामब्रवी
द्देवःपश्यकृष्णवदस्वच॥१॥ तत्रैवउपमन्युवाक्यं॥ श्रीकृष्णंप्रति॥ यंनब्रह्मादयोदेवाविदुस्तत्त्वेननर्षयः॥ स्तोतव्यमर्च्यंवंद्यंचकः
स्तोष्यतिजगत्पतिं॥१॥ तत्रैवयुधिष्ठिरंप्रतिभीष्मवाक्यं॥ ब्रह्मविष्णुसुरेन्द्राणांस्रष्टाचप्रभुरेवच॥ ब्रह्मादयःपिशाचांता
यंहिदेवाउपासते॥१॥ महादेवंप्रतिउपमन्युवाक्यंतत्रैव॥ योऽसृजद्दक्षिणादंगात्ब्रह्माणंलोकसंभवम्॥ ॥

वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरः ॥ १ ॥ युगांते चैव संप्राप्ते रुद्रमीशोऽसृजत्प्रभुः ॥ स रुद्रः संहर
न्कृत्स्नं जगत्स्थावरजंगमम् ॥ २ ॥ तत्रैव श्रीकृष्णं प्रति उपमन्युवाक्यं ॥ नास्ति शर्वसमो देवो नास्ति शर्वसमा ग
तिः ॥ नास्ति शर्वसमो दाने नास्ति शर्वसमो रणे ॥ ३ ॥ क्वचिद्गुणे शिवस्य विष्णुसाम्यादिप्रदर्शनं तु ॥ शिवस्त
वरस्य ॥ सत्यत्वप्रत्यायनार्थं ॥ तथा च महाभारते हरिवंशे श्रीकृष्णं प्रति शिववाक्यं ॥ पुरा मैनाकमाश्रित्य त
पस्त्वं ह्यकरोर्यदा ॥ तदा मम वरः कृष्ण संस्मृतस्थैर्यमाकृहि ॥ अहमप्यस्तमजयस्त्वमतः शूरतरस्तथा ॥ भ
वितासीत्यवोचं यत्तत्तथा न तदन्यथा ॥ इति ॥ अत एव रामायणे ॥ विष्णोः शिवेन सह संग्रामे ॥ अधिकं मेनिरे
विष्णुं इत्यत्र मेनिरे इत्युक्तम् ॥ तथा च बुद्धादेर्जनकत्वेन तदुपास्यत्वेन तदज्ञाततत्त्वबलवीर्यकत्वेन च शि
वस्य निरस्तसाम्यातिशायत्वात्सर्वार्थसाधनं महापातकादिसर्वाघहरं नित्यं च तत्पूजनमवश्यमेव कर्तव्यम्
॥ ॥ इति श्रीमत्स्वामिसदानंदविरचिते शैवसुधाकरे शिवपूजोत्कर्षवर्णनं नाम प्रथमः किरणः ॥
१ ॥ ॐ अथ शिवपूजनं भस्मरुद्राक्षधारणं विना न कार्यं तदुक्तं लैंगे ॥ विना भस्मत्रिपुंड्रेण विना रुद्राक्षमा
लया ॥ पूजितोऽपि महादेवो न तस्य फलदो भवेत् ॥ १ ॥ कंचिद्ब्राह्मणं प्रति विष्णुवचनं स्कंदसंहितायाम् ॥

विभूतिधारणं संत्यज्य त्यक्त्वा रुद्राक्षधारणं॥ मा मां पूजय विश्वेशं शिवं लिंगस्वरूपिणं॥१॥ सनत्कुमारसंहि
तायामपि॥ यथैव चांडालो विप्रः श्राद्धार्थं नोपयुज्यते॥ वृत्तिपर्युषितं यत्त्वनिर्भस्मैवं शिवार्चनं॥१॥ स्नाया
दर्शी नो न पुनर्भूतः पिंडमवाप्स्यति॥ तथा भस्मविहीनोपि शिवार्चनफलं परम्॥२॥ यथाह्यक्षरानुरहितोऽध्य
क्षरेणैव शोभते॥ तथा शोभसाधनोपेतं भस्महीनं शिवार्चनं॥३॥ विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः॥
भवंति पंच नामानि पंचभिर्हेतुभिर्भृशं॥४॥ ऐश्वर्यकारणाद्भूतिर्भस्म सर्वाघभक्षणात्॥ भासनाद्भसितं प्रोक्तं क्षा
रणात्क्षारमापदां॥ रक्षारक्षोगणेभ्यश्च रक्षणात्परिकीर्तितं॥ देवीभागवते॥ कीकटे च विदेशेषु यत्र भूतिवि
भूषणः॥ मानवस्तत्र वसेन्नित्यं काशीक्षेत्रसमं हितत्॥१॥ तथा नास्य ज्ञानं परीक्षेत न कुलं न व्रतं तथा॥ त्रिपुंड्रांकि
तभालेन पूज्य एव हि नारद॥ तथा॥ श्वपचोऽपि वरेण्यो हि भूतिशासनमेश्वरं॥ सोऽपि यां गतिमाप्नोति न तां यज्ञशतैर
पि॥ ये घोरा राक्षसाः प्रेता ये चान्ये क्षुद्रजंतवः॥ त्रिपुंड्रधारिणं दृष्ट्वा पलायंते न संशयः॥२॥ भस्मधारणं शि
वपूजायामेव कर्तव्यं इत्येवं नियमो नास्ति॥ किंतु सर्वेष्वपि कर्मसु भस्मधारणं कार्यं॥ तथा च बृहज्जाबाले॥ ये
भस्मधारणं त्यक्त्वा कर्म कुर्वंति मानवाः॥ तेषां नास्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः॥१॥ महापातकयुक्तानां

पूर्वजन्मसु सर्वतः ॥ त्रिपुंड्रोद्धूलनं नष्टो जायते स्फुटं बुध ॥ इति शिवरहस्ये ॥ सर्वकर्मबहिर्भूतो भस्मधारण
वर्जितः ॥ भस्मनारहितं कर्म वृथा भवति सर्वथा ॥ १ ॥ विभूतिधारणं त्यक्त्वा कुर्वन्नैमित्तिकामपि ॥ तत्फलं न समा
प्नोति पतितोपि न विद्यति ॥ २ ॥ संध्याशिवार्चनादीनि कर्माण्येतानि वस्तुतः ॥ वैदिकानि ततस्तेषु कर्तव्यं भस्म
धारणं ॥ ३ ॥ यथोपवीतरहितैः संध्या न क्रियते द्विजैः ॥ तथा संध्या न कर्तव्या विभूतिरहितैरपि ॥ ४ ॥ विभू
तिधारणं त्यक्त्वा यदि संध्यां करोति सः ॥ प्रत्यवैत्येव येनासौ नाधिकारी तदा द्विजः ॥ ५ ॥ यथा धीत्यांत्यजो वे
दान्मृत्युं वैति तथा द्विजः ॥ प्रत्यवैति न संदेहः संध्याकृद्भस्मवर्जितः ॥ ६ ॥ न संविशंति पापानि भस्मनिष्ठेत
तः सदा ॥ कर्तव्यमहिमत्वेन ब्राह्मणैर्भस्मधारणं ॥ ७ ॥ यत्कृतं भस्मनिष्ठेन श्रीमहादेवस्य पूजनं ॥ तत्सर्वा
भीष्टदं तस्मात्कर्तव्यं भस्मधारणं ॥ ८ ॥ उद्धूलनत्रिपुंड्राभ्यां मंत्रं कृततनुः शिवं ॥ योर्चयिष्यति तत्सोनु
विक्रोवा न विद्यति ॥ ९ ॥ शिवगीताटीकायां वसिष्ठः ॥ न तत्स्नानं न तज्ज्ञानं न तद्दानं जपो न सः ॥ त्रिपुंड्रेण विनायेन
विप्रेणाय दनुष्ठित ॥ १ ॥ देवीभागवते ॥ न गायत्र्युपदेशोस्ति भस्मनो धारणं विना ॥ ततोर्ध्वं चैव भस्मांगे गायत्री २
जपमाचरेत् ॥ १ ॥ गायत्रीमूलमेवाहुर्ब्राह्मण्यं मुनिपुंगवाः ॥ सा भस्मधारणाभावेन केनाप्युपदिश्यते ॥ २ ॥

कात्यायनोपि॥ श्राद्धे दाने जपे होमे वैश्वदेवे सुरार्चने॥ धृतत्रिपुंड्रः पूतात्मा मृत्युं जयति मानवः॥ देवीभागवते एकाद
शस्कंधे॥ भस्मदिग्धशरीराय यो ददाति धनं मुदा॥ तस्य सर्वाणि पापानि विनश्यंति न संशयः॥१॥ तथा भवि-
ष्यपुराणे॥ सत्यं शौचं जपो होमस्तीर्थं देवादिपूजनं॥ तस्य व्यर्थमिदं सर्वं यस्त्रिपुंड्रं न धारयेत्॥१॥ आयुरादिसा
धनत्वाच्चेदं धार्यं॥ तथा च महाभारते॥ आयुःकामोथवा राजन् भूतिकामोथवा नरः॥ नित्यं वै धारयेद्भस्म मोक्ष
कामी च वै नरः॥१॥ देवीभागवते एकादशस्कंधे॥ एतच्छिरोव्रतं कुर्यात्संध्याकालेषु सादरं॥ यावद्विद्योदयस्ता
वत्तस्य विद्या खलु समा॥१॥ शिरोव्रतमुद्धूलनमिति व्याख्याति॥ उत्तमा विद्या ब्रह्मविद्येति नीलकंठः॥ महापातका
दिपापनाशहेतुत्वाच्चेदं धार्यं॥ तथा च विष्णुधर्मोत्तरे नारदः॥ भस्म वै परमं पुण्यं ब्रह्मविष्णुशिवात्मकं॥ येन दृष्टेन
पापानि नाशमायांति सर्वथा॥१॥ महाभारते॥ अगम्यागमने राजन् प्रायश्चित्तं विधीयते॥ आर्द्रवस्त्रेण षण्मासा
न्विहायं भस्मस्नायिना॥१॥ एष एव तु सर्वेषामकार्याणां विधिर्भवेत्॥ वृद्धशातातपः॥ महापी च गुरुदारांश्च ग-
त्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा॥ भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते सर्वपापैः॥१॥ पापानि कुर्वंता
पि च पापसंगपरिहाराद्भस्म धार्यं॥ न संश्लिष्यंति पापानीत्युदाहृतशिवरहस्यवचनात्॥१॥ देवीभागवते॥ भस्म ह

णं येषां भस्मधारणपूर्वकं ॥ तेषां तद्भस्ममेवस्यान्मुने नात्र विचारणा ॥ १ ॥ नित्यस्याच्च भस्म सदा धार्यं ॥
तथा च तैत्तिरीयकश्रुतिः ॥ नूत्नेन त्रयमदितव्यमिति ॥ १ ॥ राघवणभाष्ये ॥ श्रुतिश्चाप्यर्थेन सोमेतिस्पष्टमुक्तम् ॥ स्कन्दसंहितायां च तद्देवोपबृंहितं ॥ तद्यथा ॥ सत्यात्कृधर्मादपि कुलाद्भस्मनोऽद्भूतनाद्यपि ॥ त्रिपुण्ड्रधारणाच्चैव सदा नच्छ्युतो न वदिति ॥ १ ॥ सनत्कुमारसंहितायां तद्द्विविधमुक्तम् ॥ तत्पुनर्द्विविधं प्रोक्तं मुख्यं गौणं तथैव च ॥ मुख्यं प्रोक्तं परं ब्रह्म गौणमाग्नेयमुच्यते ॥ गौणं नानाविधं विद्धि ब्रह्मन्ब्रह्मविदांवर ॥ अग्निहोत्राग्निजं तद्वद्विरजाहोमजं मुने ॥ औपासनसमुद्भूतं समिदग्निसमुद्भवं ॥ पचनाग्निसमुद्भूतं दावानलसमुद्भवं ॥ एतेषां भस्मभेदानां वर्णभेदेन व्यवस्थोक्ता क्रमादेः ॥ ब्रह्मक्षत्रियवैश्यानां त्वग्निहोत्रसमुद्भवं ॥ शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवं ॥ १ ॥ अन्येषां मानवानां तु स्मृतं दावानलोद्भवं ॥ आश्रमभेदेनापि व्यवस्थास्त्येव ॥ समिदग्निसमुद्भूतं धार्यं वै ब्रह्मचारिभिः ॥ अग्निहोत्रसमुद्भूतं गृहस्थैर्वनवासिभिः ॥ १ ॥ श्रौताग्निरहितायैवतेषामौपासनोद्भवं ॥ १ ॥ वायवीये तु ॥ सर्वेषां गोमयजं चापि भस्मोक्तं ॥ तथा हि ॥ शिवाग्नेर्भस्मसंग्राह्यमग्निहोत्रोद्भवं तु वा ॥ वैवाह्याग्निसमुद्भवं वा विपक्वं शुचिसद्गंधि च ॥ कपिलायाः शकृच्छस्तं गृहीतं गगनेपतत् ॥ न क्लिन्नं ना ॥

तिकविनंनदुर्गंधिमथोषितं ॥ २ ॥ उपर्यधः परित्यज्य गृह्णीयात्पतितं यदि ॥ पीडीकृत्य शिवाग्नौ तु तत्क्षिपेन्
मूलमंत्रतः ॥ ३ ॥ अपक्वमतिपक्वं च संत्याज्यमसितं सितं ॥ आदाय वाससालोड्य भस्माधारे विनिक्षिपेत् ॥ ४ ॥ भ
स्मसंग्रहणं कुर्याद्देवेनुद्वासिते सति ॥ उद्वासने कृते यस्मात्खंडं न समञ्जायते ॥ ५ ॥ यद्वा द्विजा भस्म कुर्युः स
द्योनानीयगोमयं ॥ वामेन पात्रे संयोज्य घोरमंत्रेण निर्दहेत् ॥ ६ ॥ पुरुषेण समुद्धृत्य ईशानेन विशोधयेत् ॥ इत्थं
तु संस्कृतं भस्म अग्निरित्यादिमंत्रतः ॥ इत्यादि ॥ अस्य शिवाग्नेः सद्यादिमंत्रैर्भापिव्यवस्थास्य देवीभागवते ए-
कादशस्कंधे दशमेऽध्याये विस्तरेण निरूपणं कृतमिह विस्तरभयान्नोक्तमिति ततएवावधार्यम् ॥ शूद्रहस्ताद्द्विजे
न्द्रस्य न ग्राह्यं ॥ तदाह भारद्वाजः ॥ शूद्रहस्तास्थितं भस्म न हि धार्यं द्विजातिभिः ॥ शूद्रैरंत्यजहस्तस्थं न धार्यं भ-
स्म जातुचित् ॥ १ ॥ धारणे मंत्रानाह पुलस्त्यः ॥ अग्निरित्यादिभिर्मंत्रैः शुद्धं भस्माभिमंत्रितं ॥ शिवमंत्रेण वा धार्यं
मंत्रेण षडक्षरेण वा ॥ गायत्र्या वापि देवर्षे मंत्रेण प्रणवेन वा ॥ एतेषां कल्पविशेषं स एवाह ॥ करोति शिवमंत्रे
ण यस्त्रिपुंड्रं द्विजोत्तमः ॥ त्र्यक्षः शूलधरः सौम्यः शिवलोके महीयते ॥ अष्टाक्षरेण मंत्रेण यः करोति त्रिपुंड्रकं ॥
विष्णोः पदमवाप्नोति गायत्र्या मुनिपुंगव ॥ प्राप्नोति ब्रह्मणो रूपं प्रणवेन न संशयः ॥ अष्टाक्षरमंत्रस्तु ॥ ॐ नमो

नारायणाय॥ गायत्र्यपि प्रसिद्धैव ज्ञेया॥ अथ धारणे वर्णाश्रमभेदेन मंत्रभेदमाह॥ लैंगे॥ त्र्यायुषेति मंत्रेण त्रि
पुंड्रं ब्रह्मचारिणः॥ अग्निरित्यादिभिर्मंत्रैः पंचब्रह्ममयैस्तथा॥१॥ त्र्यंबकेति मंत्रेण तारेण प्रणवेन च॥ पंचाक्ष
रेण मंत्रेण प्रणवेनान्वितेन च॥२॥ त्रिपुंड्रं धारयेन्नित्यं गृहस्थश्च गृही ह्याश्रमी॥ प्रणवेनैव संधार्यं संन्यासाश्रमवर्त्ति
भिः॥३॥ नमोंतेन शिवेनैव धार्यं शूद्रैः स्त्रियां तथा॥ अन्येषामपि सर्वेषां विना मंत्रेण सुव्रत॥४॥ भस्मनो धारणं प्रो
क्तं नित्यं शैवागमेषु च॥ उद्धूलनं त्रिपुंड्रं च धारणं द्विविधं मतं॥५॥ उद्धूलनत्रिपुंड्राभ्यां समुच्चयेन धारणं कर्त्तव्यं॥
उद्धूलनं त्रिपुंड्रं च नित्यं धार्यं द्वयं ततः॥ उद्धूलनं त्रिपुंड्रं च मनसापि न लंघयेत्॥६॥ इति केदारखंडे॥ समुच्चय
विधानात्॥ विश्वेश्वरसंहितायामपि॥ तस्मादुद्धूलनं पूर्वं त्रिपुंड्रं धारयेत्परं॥१॥ इति समुच्चयो विहितः॥ उद्धूलनं
द्विविधं॥ पूजार्थं शुद्ध्यर्थं च॥ पूजार्थं सजलेन भस्मना कार्यं॥ शुद्ध्यर्थं तु केवलेन भस्मनैव॥ पूजाकाले हि सजलं
शुद्ध्यर्थं निर्जलं भवेदिति विश्वेश्वरसंहितायावचनात्॥ दिवा वाथ दिवा रात्रौ नारी वाथ नरोपि वा॥ पूजार्थं सजलं भस्म
शुद्ध्यर्थं केवलं भवेत्॥ इति विश्वेश्वरसंहितायां॥ मध्याह्नादूर्ध्वमपि सजलस्यैव विधानात्॥ मध्याह्नात्प्राक् जलैर्युक्तं तो
यं तदनु वर्जयेदिति वचनं स्त्रीयत्यादिविषयं॥ तदुक्तं स्मृतिसंग्रहे॥ धार्यं भस्म त्रिसंध्यं तु गृहिणा जलसंयुतं॥ सर्वकालं भवे ५

स्त्रीणां यतीनां जलवर्जितं ॥ ५ ॥ वनस्थव्रतिकन्यानां दीक्षाहीनां नृणां तथा ॥ मध्याह्नात्प्राग्जलैर्युक्तं परतो जलव-
र्जितं ॥ इति त्रिपुंड्रं सजलेनैव कार्यं ॥ तदुक्तं तत्रैव ॥ सर्वदा सजलं भस्म त्रिपुंड्रे नैव धारयेत् ॥ सूतसंहितायां ॥ भस्मना
सजलेनैव धारयेत्त्रिपुंड्रकमिति ॥ तत्रैव ॥ शिवेन विष्णुना चैव ब्रह्मणा वज्रिणा तथा ॥ देवताभिर्धृतं भस्म त्रिपुं-
ड्रोद्धूलनात्मना ॥ २ ॥ उमादेव्या च लक्ष्म्या च वाचान्याभिरास्तिकाः ॥ सर्वस्त्रीभिर्धृतं भस्म त्रिपुंड्रोद्धूलनात्मना इति ।
। अथोद्धूलनप्रकारो जाबाले ॥ तत्रैते श्लोकाः ॥ अयतो भस्म गृह्णीयात्स्वयं वानुचरेण वा ॥ न चायुक्तकरे दद्यान्नं
चाप्सु विजले क्षिपेत् ॥ १ ॥ यावन्तः पतिता भूमौ भस्मनः परमाणवः ॥ तावद्वर्षसहस्राणि रोरवं नरकं व्रजेत् ॥ २ ॥ भस्मसा
त्यंतसावधानो धारयेद्भस्म बुद्धिमान् ॥ आदरेण समादाय भस्मपात्रे निधाय तत् ॥ ३ ॥ शुद्धात्मपादौ हस्तौ च शि
राचम्य समाहितः ॥ गृहीत्वा भस्मनो मुष्टिं सद्योजातादिभिर्गृही ॥ ४ ॥ प्राणायामत्रयं कृत्वा ध्यात्वा चैव सदाशिवं
॥ अग्निरित्यादिभिर्मंत्रैस्त्रिवारमभिमंत्र्य तत् ॥ ५ ॥ ईशानेन पंचधा भस्म विकिरेन्मूर्ध्नि यत्नतः ॥ मुखे च तत्पुरु-
षेणाघोरेण हृदि ॥ ६ ॥ वामेन गुह्यदेशे तु त्रिदशस्थानभेदतः ॥ अष्टधा सद्योमंत्रेण पादद्वयमयत्नतः ॥
७ ॥ संध्यात्रये निशीथे च तथा स्नानविसानयोः ॥ सुप्त्वा भुक्त्वा पयः पीत्वा कृत्वा चावश्यकादिकं ॥ ८ ॥

ऌ॰ सु॰

६

॥ ८॥ स्त्रियं नपुंसकं रुद्धं विडालं बककूर्मकौ॥ स्पृष्ट्वा तु वा विधानन्या न समाचारन्नमाचरेत्॥ ९॥ देवाग्निगुरुवृद्धा
नां समीपे त्यजेद्भुवि॥ अशुद्धभूतले मार्गे कुर्यान्नोद्धूलनं व्रती॥ आजिनं चर्मणा विपारिणा संगुप्तं तु भाग्यं देवमसमं तद्वि
पद्मानां धीनस्वेव हि॥ मध्याह्ने स्नात्वा कुजनैर्युक्तं तोयं तद्वद्वर्जयेत्॥ १४॥ इति॥ अथ मूर्द्ध्नि भस्मधारणविधिः॥ स
तु षड्विधः॥ तदुक्तं वायवीयसंहितायां॥ लिंगदीपार्द्धचंद्रं च चतुरस्रं च वर्तुलं॥ त्रिपुंड्रं चेति कथितं षड्विधं शिवशास
नं॥ १॥ वर्तुलं ब्रह्मभक्तानां क्षात्राणां चतुरस्रकं॥ वैश्यानां दीपसमं स्यादर्द्धचंद्रं तु मे वद॥ ४॥ सदाशिवस्य भक्तानां लिं
ग तिर्यक्त्रिपुंड्रकं॥ इति क्रियासारे॥ मध्यांगुलित्रयेणैव दक्षिणकरस्य यत्॥ षडंगुलायतं मानमपि वाधिकमागतं॥ १॥
नेत्रयुग्मप्रमाणेन भाले कुर्यात्त्रिपुंड्रकं॥ वर्णभेदेन मानमुक्तं॥ सिद्धांतशेखरे॥ २॥ षडंगुलायतं विप्रो वेदांगुलिक्ष
त्रितः॥ यथासंभवतः कुर्याद्देशकालादपेक्षयेति॥ २॥ तत्रैव स्मोक्ताः॥ त्रिपुंड्रं धारयेन्नित्यं ब्रह्मविष्णुशिवात्मकं
॥ ऊर्ध्वपुंड्रं भवेत्साम मध्यपुंड्रं यजुर्भवेत्॥ १॥ अधःपुंड्रमृचः साक्षात्तस्मात्पुंड्रं त्रियायुषं॥ आदरेण समालभ्य भस्मपा
त्रे निधाय च॥ २॥ प्रक्षाल्य पादौ हस्तौ च बहिराचम्य समाहितः॥ गृहीत्वा भस्मसंपुटं च ब्रह्मभिर्मंत्रैः शनैः करे॥ ३॥ पंचब्रह्ममं
त्राः सद्योजातादयः॥ अग्निरित्यादिभिर्मंत्रैः षड्भिश्चैवाभिमंत्रयेत्॥ ४॥ ॐ मापो मो ति रिषु स्का ध्यात्वा चित्ते जलाद्विपं

संयोज्य वारिणा भस्म मानस्तोके तिमर्दयेत् ॥५॥ मध्यांगुलिभिरादाय तिसृभिर्मूलमंत्रितं ॥ अनामामध्यमांगुष्ठैरथ
वास्यात्त्रिपुंड्रकं ॥६॥ अकारोनामिकाप्रोक्ताउकारोमध्यमांगुलिः ॥ मकारस्तर्जनीतस्मात्ताभिः कुर्यात्त्रिपुंड्रकं ॥७॥
भ्रुवोर्मध्यात्समारभ्य यावदंतो भवेद्भ्रुवोः ॥ अकारोगार्हपत्योग्निर्भूरात्मा च रजोगुणः ॥८॥ ऋग्वेदश्च क्रियाशक्तिः
प्रातःसवनमेव च ॥ महादेवश्च रेखायाः प्रथमायाश्च देवता ॥९॥ उकारो दक्षिणाग्निश्च अंतरात्मा च यजुः ॥ सत्वं मा
ध्यंदिनसवनं इच्छाशक्तिस्तथैव च ॥१०॥ महेश्वरश्च रेखायाः द्वितीयायाश्च देवता ॥११॥ मकाराहवनीयोग्निः परमात्मात
मोदिवा ॥ ज्ञानशक्तिः सामवेदस्तृतीयं सवनं तथा ॥१२॥ दिवा सहेत्यर्थः ॥ शिवश्चेति तृतीयायाः रेखायास्त्वधिदेवता
एतान्नित्यं नमस्कृत्य त्रिपुंड्रं धारयेच्छुचिः ॥१३॥ स्मरन्नमः शिवायेति ललाटे च त्रिपुंड्रकं ॥ स्वच्छाभ्यां नमइत्युक्त्वा धार
येत्तत्प्रकोष्ठयोः ॥१४॥ भीमायेति ततः पृष्ठे शिवाय जठरे तथा ॥ नीलकंठाय शिरसि क्षिपेत्सर्वात्मने नमः ॥१५॥ पापं च
नाशयेत्कृत्स्नं पूर्वजन्मशतार्जितं ॥ कंठोपरिकृतं पापं नष्टं स्यात्तत्र धारणात् ॥१६॥ कर्णे च धारणात्कर्णरोगादि
कृतपातकं ॥ बाह्वोर्बाहुकृतं पापं वक्षसि मनसा कृतं ॥१७॥ नाभ्यां शिश्नकृतं पापं कट्यां गुदकृतं तथा ॥ पार्श्वयोर्धा
रणात्पापं परस्त्र्यालिंगनादिकं ॥१८॥ तद्भस्मधारणं कुर्यात्सर्वत्रैव त्रिपुंड्रकं ॥ ब्रह्मविष्णुमहेशानां त्र्यग्नीनां च धा

रणं॥१९॥ गुणत्रोकस्त्रयाणां च धारणं तेन वै कृतं॥२०॥ इति॥ भस्मोपरि चंदनादिकं धार्यं॥ तदुक्तं कौर्मे॥ वै
दिकैर्मन्त्ररहितं चंदनागरुकुंकुमं॥ तिर्यक्पुंड्रात्मना धार्यं कांतिसौख्याभिलाषिभिः॥१॥ पुंड्रोद्धूतस्त्वं चंदनाद्यैरिति
भस्म न संत्यजेत्॥ दस्येत भस्मसंत्यागी कृतीह्याक्रोधवह्नितः॥२॥ चंदनाद्युपरि भस्मोद्धारयेद्भस्म वैदिकं॥ लौकि
कं चंदनाद्यं तु भस्मोपरि प्रधारयेत्॥३॥ भस्मवच्चंदनादीनां त्यागेन दोषो न विद्यते॥ चंदनादीन्यतो लौकिकान्येवा
त्र न संशयः॥४॥ दृष्टकांत्याद्यर्थं चंदनादेरुपरि भस्मनि॥ इति किंचिच्चंदनादेर्धारणस्य फलं न चेत्॥५॥ उपरिष्टा
च्चंदनादेर्धृते त्वेसित भस्मनि॥ चंदनाद्यस्य भस्मोक्तफलादेः को निवारकः॥६॥ त्रिपुंड्रधारणं मंत्ररहितं न तु हीन
कार्यं॥ तदुक्तं सुधासिंधौ॥ त्रिपुंड्रं कं सदा कुर्यान्मंत्रपूतेन भस्मना॥ मंत्रहीनं तु यः कुर्यात्स पापभागी भवेन्नर इति
॥१॥ अत्रेदं बोध्यं॥ एतादृशानि वाक्यानि॥ अमंत्रकधारणनिंदाव्याजेन समंत्रकतद्धारणमतिप्रशस्तमिति बो
धने तात्पर्यवंति॥ न त्वमंत्रकनिंदायामेव तात्पर्यवंतीति भ्रमितव्यं॥ न हि निंदेति न्यायात्॥ सामान्यभस्मधारणवि
धिवाक्यानां संकोचे गौरवात्॥ अत एव छद्मनापि तद्धारणं स्तुतं देवीभागवते॥ न हि च्छद्मकृतं हि द्धिमाति वति॥
परद्रव्यमात्रस्य केवलं भस्मनापि संभवेन विधेस्तत्स्यानपेक्षितत्वादेवमन्यत्रापि अन्यथा करणेऽकस्यं॥ अत ए

वक्षःपादस्थलस्य भस्मस्पर्शो न्नृतस्य गतिर्जातेत्यादि पौराणिकं तु होमः संगच्छते ॥ उद्धूलनेऽप्यशक्तश्चेत्त्रिपुंड्रा
दीनि धारयेत् ॥ आदिनाऽर्द्धचंद्रकलिकाकारादिकं ग्राह्यम् ॥ वैष्णवादीनां दीपचतुरस्रोर्ध्वाकार भस्मधारणस्य
पूर्वसूक्तत्वात् ॥ ननु ॥ एवं श्रुतिस्मृतीतिहासपुराणसिद्धकर्तव्यताके भस्मधारणे केषांचिद्विद्वेषो दृश्यते ॥ तत्र
किं कारणमिति चेत्पूर्वार्जितमहापातकादिसंकीर्णं वंशानलवपाराशरीये ॥ महापापवतां नॄणां वेदसिद्धे महेश्वरे ॥ त्रिपुंड्रो
द्धूलनादौ विद्वेषः संप्रजायते ॥ वासिष्ठलैंगे ॥ येषां न भस्मा न रुद्राक्षे विद्वेषो वर्तते हृदि ॥ संकीर्णास्ते न वेद्धूल
त्तेषां वरापरे परा ॥ भस्मोद्धूलनस्यैव शिरोव्रतमिति नाम्ना पाशुपतव्रतमिति नाम्ना चाथर्वशिरसि व्यवहा
रः ॥ तथा च देवीभागवते एकादशस्कंधे ॥ सर्वांगोद्धूलनं कुर्याच्छिरोव्रतसमाह्वयमिति ॥ शिरोव्रतमिदं
नाम सिरस्याथर्वणिकाश्रुती इति ॥ शाखाभेदेषु नामानि व्रतस्यास्य विभेदतः ॥ पठ्यंते मुनिशार्दूल शाखास्वे-
कं व्रतं हितदिति च ॥ एवमनुपक्रम्याति माहात्म्यं चास्य तत्रोक्तं ॥ ॥ इति श्रीमत्स्वामिसदानंदविरचिते शै
वसुधाकरे भस्मनिरूपणं नाम द्वितीयः किरणः ॥ २ ॥ ॥ अथ रुद्राक्षमहिमा ॥ बृहज्जाबाले ॥ अथ
भुसुंडः कालाग्निरुद्रं पप्रच्छ ॥ कथं रुद्राक्षोत्पत्तिस्तद्धारणे किं फलमिति ॥ स होवाच भगवान्कालाग्निरुद्र

त्रिपुरवधार्थायाहममीलिताक्षोभवं ।। नेत्रेभ्यो जलबिंदवो भूमौ पतितास्ते रुद्राक्षा जाताः ।। सर्वानुग्रहार्थाय तेषां
नामोच्चारणमात्रेण दशगोदानफलं ।। दर्शनस्पर्शनाभ्यां द्विगुणं फलमत ऊर्ध्वं वक्तुं न शक्नोमि ।। देवीभागव
ते एकादशस्कंधे ।। फलस्य दर्शने पुण्यं स्पर्शात्कोटिगुणं भवेत् ।। शतकोटिगुणं पुण्यं धारणाल्लभते नरः ।।१।। ल
क्षकोटिसहस्राणि लक्षकोटिशतानि च ।। जपाच्च लभते नित्यं नात्र कार्या विचारणा ।।२।। शिवरहस्ये ।। रुद्राक्षद
र्शनेनापि नश्यत्यघकुलं क्षणात् ।। रुद्राक्षमालिकां कृत्वा कुरु रुद्राक्षधारणं ।।१।। रुद्राक्षधारणं कृत्वा भस्म
धारणपूर्वकं ।। कृतानंतमहापापो ह्यनायासेन मुच्यते ।।२।। वेदस्याध्ययनं कार्यमुपवीतैर्यथा तथा ।। रुद्रा
क्षधारिभिः कार्यं सर्वशः शिवपूजनं ।।३।। विभूतिधारणं कृत्वा कृत्वा रुद्राक्षधारणं ।। यः शिवं पूजयेद्भक्त्या स
मोक्षमधिगच्छति ।।४।। रुद्राक्षाण्युपक्रम्य बौधायनोऽपि ।। यस्तानि धारयन्गच्छत्युन्मिषन्निमिषन्नपि ।। सर्वाण्ये
नांसि तरति रुद्रो भूत्वा ह्यमृतत्वमेति ।। वासिष्ठे ।। खादन्मांसं पिबन्मद्यं संगच्छन्नंत्यजादिभिः ।। सद्यो भवति पूतात्मा
रुद्राक्षे शिरसि स्थिते ।।१।। देवीभागवते ।। अनेन तु मुखं देवेन भुक्तं यस्तु तथा भवेत् ।। पीतं रुद्रेण तत्पीतं घ्रातं घ्रातं शि
वं भवेत् ।। देवीभागवते एकादशस्कंधे ।। रुद्राक्षधारणे लज्जा येषामस्ति महामुने ।। तेषां नास्ति विनिर्मोक्षः संसारजन्म

कोटिभिः ॥४॥ रुद्राक्षधारिणं दृष्ट्वा परिवादं करोति यः ॥ उत्पत्तौ तस्य सांकर्यमस्त्येवेति विनिश्चयः ॥२॥ तथा ॥ रुद्रा-
क्षधारिणे भक्त्या वस्त्रं धान्यं ददाति यः ॥ सर्वपापविनिर्मुक्तः शिवलोकं स गच्छति ॥१॥ रुद्राक्षधारिणं श्राद्धे भो-
जयेत विमोहतः ॥ पितृलोकमवाप्नोति नात्र कार्या विचारणा ॥२॥ रुद्राक्षधारिणः पादौ प्रक्षाल्याद्भिः पिबेन्नरः ॥
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥३॥ तथा ॥ अन्नस्येषु च दानेषु रुद्राक्षस्तु विनिक्षिप्यते ॥ शिवभक्ताय
शांताय दद्याद्रुद्राक्षमुत्तमं ॥४॥ देवीभागवते एकादशस्कंधे ॥ रुद्राक्षालंकृता ये वै ते वै भागवतोत्तमाः ॥ रुद्राक्ष-
धारणं कार्यं सर्वैः श्रेयोऽर्थिभिर्नृभिः ॥१॥ ते भागवतोत्तमा ये च वै श्रेष्ठाः ॥ कर्णपाशे शिखायां वा कंठे हस्ते त-
थोदरे ॥ महादेवश्च विष्णुश्च ब्रह्मा तेषां विभूतयः ॥२॥ देवाश्चान्ये तथा भक्त्या खलु रुद्राक्षधारिणः ॥३॥ तथा ॥
शिरसा धारिते कोटिः कर्णयोर्दशकोटयः ॥ शतकोटिर्गले बद्धा मूर्ध्नि कोटिसहस्रकं ॥१॥ अयुतं चोपवीते तु
लक्षकोटिर्भुजे स्थिते ॥ मणिबंधे तु रुद्राक्षो मोक्षसाधनकः परः ॥२॥ रुद्राक्षधारको भूत्वा यत्किंचित्कर्म वैदिकं
॥ कुर्वन्विप्रः सदा भक्त्या महदाप्नोति तत्फलं ॥३॥ तथा च ॥ भक्त्या संपूज्यते नित्यं रुद्राक्षः शंकरात्मकः ॥ दरिद्रं वा-
पि पुरुषं राजानं कुरुते तु सः ॥१॥ तत्पूजनं च यथाशक्ति षोडशभिस्ततो न्यूनैर्वोपचारैर्यथाधिकारं स ब्राह्मणैर्वा नामा

रणेनवाशौचपञ्चाक्षरेणकार्यम्॥ स्कांदे॥ स्नानेदानेजपेहोमेवैश्वदेवेसुरार्चने॥ प्रायश्चित्तेतथाश्राद्धेदीक्षा
कालेविशेषतः॥ अरुद्राक्षधरोभूत्वायत्किंचित्कर्मवैदिकं॥ कुर्याद्विप्रस्तुमोहेननसदाप्नोतितत्फलं॥१॥ ब्र
ह्मोत्तरखंडे॥ रुद्राक्षंमस्तकेबद्ध्वाशिरःस्नानंकरोतियः॥ गंगास्नानफलंतस्यजायतेनात्रसंशयः॥१॥ बृहज्जाबाले
॥ धात्रीफलप्रमाणंयच्छ्रेष्ठमेतदुदाहृतं॥ बदरीफलमात्रंचमध्यमंप्रोच्यतेबुधैः॥२॥ अधमंचणकाकारंप्रक्रिये
णामयोच्यतइत्यादि॥ रहस्यार्णवे॥ रुद्राक्षाणांफलंप्रोक्तंदेविसर्षपमात्रकं॥ सर्षपादधिकाग्राह्याआर्द्रधात्रीफ
लावधि॥१॥ तदर्द्धंक्षत्रियैर्धार्यंवैश्यैर्धार्यंतदर्द्धकं॥ तदर्द्धंसंकरैर्धार्यमेवंरुद्राक्षलक्षणं॥२॥ ब्राह्मणोबिभृ
याछ्वेतान्रक्तान्राजातुधारयेत्॥ पीतान्वैश्यस्तुबिभृयात्कृष्णान्शूद्रस्तुधारयेत्॥३॥ स्वयमेवकृतद्वारंय
द्रुद्राक्षंस्यादितिसोत्तमं॥ यत्तुपौरुषयत्नेनकृतंतन्मध्यमंभवेत्॥४॥ समान्स्निग्धान्दृढान्स्थूलान्कंटकैःसंयुता
न्शुभान्॥ ह्रस्वान्क्षौमस्यसूत्रेणधारयेत्सर्वदानरः॥५॥ निघर्षेहेमरेखाभायस्यरेखाप्रदृश्यते॥ तदक्षमुत्तमंविद्या
त्तद्धार्यंशिवपूजकैः॥६॥ यत्तु॥ नान्यंविधारयेद्रमालांभक्तोवधारयेद्दिव्यादिपर्यालोचनया॥ धारयेत्॥ सर्वदान ९
रइतिवचनंमूत्रपुरीषोत्सर्गादिनिषिद्धकालेधारणविधायकमितिकेचिदाहुः॥ तन्न॥ सर्वदापदस्यसंकोचेमानाभा

वात्॥नाशुचिर्धारयेदित्यस्यजपमालाप्रकरणपठितत्वात्॥पुरीषोत्सर्गादेः॥साक्षाद्धारणविधायकवचनस
सद्भावाच्च॥तदाहवासिष्ठलैंगे॥जिघ्रन्नपितथाचाश्नन्व्रजन्नपिसंततं॥कुर्वन्नपियथागच्छन्विसृजन्नपिम
नवः॥१॥रुद्राक्षधारणादेवसर्वैःपापैर्नलिप्यते॥२॥विसृजन्मूत्रपुरीषंत्यजन्निश्चयार्थः॥शुचिर्वाप्यशुचिर्वा
पिसर्वावस्थांगतोपिवा॥३॥इत्यादिलैंगवचनात्संख्यापितत्रैवोक्ता॥शिखायामेकरुद्राक्षंत्रिंशतंशिरसावहेत्॥
षट्त्रिंशतिंगलेदध्यात्बाह्वोःषोडशषोडश॥१॥द्वादशंमणिबंधेपिस्कंधेपंचशतंवहेत्॥अष्टोत्तरशतैर्माला
मुपवीतंप्रकल्पयेत्॥४॥अस्मिन्पक्षेपंचदशकर्णेचत्वारिवामकर्णइतिशिष्टसमाचाराद्बोध्यं॥द्विसरंत्रिसरंवा
पिसराणांपंचकंतुवा॥सराणांसप्तकंवापिबिभृयात्कंठदेशतः॥५॥त्रिशतंत्वधमंपंचशतंमध्यमुच्यते॥सहस्र
मुत्तमंप्रोक्तमेवंभेदेनधारयेत्॥२॥इदंचधारणंविनियममात्राद्यथास्यात्तथैव॥अक्षोत्तरखंडे॥सहस्रंधारयेद्य
स्तुरुद्राक्षाणांधृतव्रतः॥तंनमंतिसुराःसर्वेयथारुद्रस्तथैवसः॥१॥अभावेतुसहस्रस्यबाह्वोःषोडशषोडश॥एकंशिखा
यांकरयोर्द्वादशद्वादशैवहि॥२॥द्वात्रिंशत्कंठदेशेतुचत्वारिंशत्तुमस्तके॥एकैकंकर्णयोःषट्षट्वक्षस्यष्टोत्तरं
शतं॥३॥योधारयतिरुद्राक्षान्रुद्रवत्सोपिपूज्यते॥देवीभागवतेएकादशस्कंधे॥रुद्राक्षंयच्छिखायांतत्तारतत्त्वं

नितिस्मरेत्॥ कर्णयोरुभयोर्ब्रह्मन्देवदेवीं च भावयेत्॥२॥ यज्ञोपवीते वै दंष्ट्र तथा हस्ते च शिरः स्मरेत्॥ मुक्ताप्रवाल
स्फटिकवैडूर्यरत्नकांचनैः॥३॥ समंताद्धारयेद्यस्तु रुद्राक्षान्स शिवो भवेत्॥ केवलान्वापि रुद्राक्षानन्यथा लब्धा
१० बिभर्त्तियः॥४॥ यस्यांगे नापि रुद्राक्षः एकोपि बहुपुण्यदः॥ तस्य जन्म निरर्थं स्यात्त्रिपुंड्ररहितं यथा॥५॥ स्कांदे॥
ओंकारमाहात्म्ये॥ रुद्राक्षाणां सहस्रं हि मुमुक्षुर्धारयेत्सदा॥ तदभावे शतं वापि दशावैकमथापि वा॥१॥ शंकरसंहिता-
यां॥ धर्त्तव्यमेतत्सूत्रेण सौवर्णेनाथवा द्विजाः॥ तस्मात्सर्वप्रयत्नेन नमस्तु रुद्राक्षभूषणः॥१॥ न विस्मृतिर्यज्ञसूत्रेणां भवे
न्निर्णय एव सः॥ रुद्रस्यात्ततया विप्रा रुद्राक्षमिति कीर्त्तितं॥२॥ रुद्राक्षधारके शंभुः परिपूर्णकटाक्षवान्॥ रुद्राक्षधार
काः सर्वे रुद्राकाराः प्रकीर्त्तिताः॥३॥ ज्ञात्वा ये शिवभूषणं परमं स्वर्गापवर्गप्रदं रुद्राक्षं विधिमानुनानिजतनो सम्य
क्सदा बिभ्रति॥ तेषां दग्धनिजैनसामिह फलं जानाति को वा सुधीस्त्र्यक्षाच्छंकरमंबिकागणपतिं नहिं तथा वक्तुमुखं॥४
॥ धारणे मंत्राः प्रोक्ता बृहज्जाबाले॥ सद्योजातेन शिरसि वामदेवेन कर्णयोः॥ अघोरेण गले धार्यं हृदि तत्पुरुषेण च॥१
॥ ईशानाख्येन मंत्रेण करयोर्धारयेत्सुधीः॥ ब्रह्मचारिगृहस्थानां वनस्थानां तथैव च॥ रुद्राक्षधारणे मंत्राः प्रोक्ता वै
विप्रयोनिना॥ प्रणवेनैव संधार्या यतिभिः सर्वसिद्धये॥३॥ द्विजानां मंत्रतः प्रोक्तमन्येषां मंत्रवर्जितं॥ शिवरहस्ये॥ ॥ १०

एकवक्त्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति।।अवंध्यत्वंप्रतिस्रोतोवन्हिस्तंभंकरोतिच।।१।। द्विवक्त्रोहरगौरीस्यात्गोव
धाद्यघनाशकृत्।।त्रिवक्त्रोह्यग्निजन्माथपापराशिंप्रणाशयेत्।।२।।चतुर्वक्त्रःस्वयंब्रह्मानरहत्यांव्यपोहति।।पंचव
क्त्रस्तुकालाग्निरगम्याभक्ष्यपापनुत्।।३।।षड्वक्त्रस्तुगुहोज्ञेयोभ्रूणहत्यादिनाशयेत्।।सप्तवक्त्रस्त्वनंतःस्यात्स्वर्णस्ते
याद्दिपापहृत्।।४।।विनायकोष्टवक्त्रःस्यात्सर्वानृतविनाशकृत्।।भैरवोनववक्त्रस्तुशिवसायुज्यकारकः।।५।।द
शवक्त्रःस्मृतोविष्णुर्भूतप्रेतभयापहः।।एकादशमुखोरुद्रोनानायज्ञफलप्रदः।।६।।द्वादशास्यस्तथादित्यःसर्वरोगनि
बर्हणः।।त्रयोदशमुखःकामःसर्वकामफलप्रदः।।७।।चतुर्दशास्यःश्रीकंठोवंशोद्धारकरःपरइति।।केदारखंडे
तु।।एकमुखादारभ्यषोडशमुखपर्यंतंरुद्राक्षाउक्तास्तेषुएकमुखपंचमुखावतिश्रेष्ठावितिचोक्तं।।तथाहि।।आर
भ्येकमुखंतावद्यावत्वक्त्राणिषोडश।।एतेषांद्वौचविज्ञेयौश्रेष्ठौधारयतांनरैः।।१।।रुद्राक्षाणांपंचमुखस्तथैवैकमु
खःस्मृतः।।येधारयंत्येकमुखंरुद्राक्षंनित्यमेवहि।।२।।जीवन्मुक्तास्तुविज्ञेयानरास्तेनात्रसंशयः।।एकवक्त्रःशिवः
साक्षात्ब्रह्महत्यांव्यपोहति।।२।।येरुद्राक्षंपंचमुखंधारयंत्यनिशंनराः।।रुद्रलोकंचगच्छंतिभोगान्रुद्रेणभुंजते
।।२।।इति।।पंचामृतंपंचगव्यंस्नानकालेप्रयोजयेत्।।रुद्राक्षस्यप्रतिष्ठायांमंत्रंपंचाक्षरंतथा।।१।।त्र्यंबकादिकमं

त्रं चैव तथा तत्र ग्रथयेत्॥ यद्वा॥ ॐ अघोरेभ्यो ह्रीं अघोरतरेभ्यो ह्रौं ह्रां नमस्ते रुद्ररूपेभ्यः स्वाहा॥ अनेनाभिमंत्र्य
धारयेत्॥२॥ अथ मालाप्रकारो रुद्रयामले॥ त्रिंशद्भिः कृता माला धनदा जपकर्मणि॥ सप्तविंशतिसंख्या
तै रक्षैः पुष्टिप्रदा भवेत्॥१॥ पंचविंशतिसंख्यातैः कृता मुक्तिप्रदा भवेत्॥ अक्षैः पंचदशाभिश्च अभिचारफल
प्रदा॥२॥ स्कांदे पि॥ अष्टोत्तरशतेनापि माला सर्वार्थसाधिका॥ रुद्राक्षमूलं तु ब्रह्मा तन्नालं विष्णुरुच्यते॥१॥
तन्मुखं रुद्र इत्याहुर्बिंदवः सर्वदेवताः॥ अक्षसूत्रं प्रकर्तव्यं गोपुच्छवन्नयाकृति॥२॥ वक्त्रं वक्त्रेण संयोज्य
पुच्छं पुच्छेन योजयेत्॥ मेरुमूर्द्धमुखं कुर्यात्तदूर्ध्वं नागपाशकं॥३॥ प्रक्षाल्य गंधतोयेन पंचगव्येन चोपरि॥ ततः
शिवांभसा क्षाल्य मूलमंत्रं ततो न्यसेत्॥४॥ पश्चात्संपूजयेत्तां हि गंधपुष्पाक्षतादिभिः॥ मूलमंत्रं समुच्चार्य
शुद्धभूमौ निधाय च॥५॥ पूजयेन्मूलमंत्रेण तस्यां देवं सदा बुधः॥ रुद्राक्षमालामेवं हि जपयोग्या ततो भवेत्॥६
॥ नाच्छिद्धारयेद्रुद्रमालां तत्रैव धारयेत्॥ अन्यमाला पुनस्त्याज्या जपकाले सुमेधसा॥७॥ परहस्तगता माला
निष्फला जपकर्मणि॥ जपकाले तु मालां तां गुरोरपि न दर्शयेत्॥८॥ वर्ज्यानाह स्कांदे॥ कृमिदष्टां छिन्नभि
न्नां कंटकैर्हीनमेव च॥ व्रणयुक्तमवृत्तं च षट् रुद्राक्षाणि वर्जयेत्॥ अत्रेदं बोध्यं यानि चत्वारि अमंत्रकरुद्रा ११

क्षधारणनिषेधकानि॥ तानि मन्त्रभिन्नादीति न्यायेन समन्त्रकधारणेऽप्युत्कर्षबोधनपराणि न तु अमन्त्रक
धारणनिषेधपराणीति मन्तव्यं॥ मंत्रानुपादानेन रुद्राक्षधारणे बहुपुण्यवत्वे फलातिशयदर्शनात्॥ तथाच
॥ देवीभागवते एकादशस्कंधे॥ रुद्राक्षं केवलं वापि यत्र कुत्र महामते॥ समन्त्रकं वामन्त्रेण रहितं भाववर्जितं॥ १
॥ यो वा को वा नरो भक्त्या धारयेल्लज्जयापि वा॥ सर्वपापविनिर्मुक्तः सम्यक् ज्ञानमवाप्नुयात्॥ एतेन शिरःकर्ण
ध्यंगनियमो विव्याख्यातः॥ यत्र कुत्रेत्यभिधानात्॥ एवं कामिकादि वर्जन विषयेपि व्याख्यातव्यं॥ भूमिस्थरु
द्राक्षखंडे मृतस्य स्नानस्योक्तिः इति भूदिति पौराणिकोद्घोषात्॥ ३॥ ॥ इति श्रीमत्स्वामिसदानंदविरचिते
शैवरुद्राक्षधारणे रुद्राक्षोत्कर्षनिरूपणं नाम तृतीयः किरणः॥ ३॥ अथ महाभारते॥ जान्हवीतीरसंभूतां मृदं मूर्ध्नि
बिभर्ति यः॥ बिभर्ति रूपं सोऽर्कस्य तमोनाशाय केवलं॥ १॥ अन्यत्र तु॥ ऊर्ध्वपुंड्रं मृदा शुभ्रं ललाटे यस्य दृश्यते॥
स चंडालोपि शुद्धात्मा पूज्य एव न संशय इत्यादि वचनैः मृदोर्ध्वपुंड्रमपि विधीयते॥ तत्कथं भस्मरुद्राक्षमात्रधा
रणमेव कर्तव्यतया प्रतिपाद्यत इति चेदित्थं॥ तत्रैतावत्प्रतिपादितं स्वाभावनिरूप्यर्थे ऊर्ध्वपुंड्रादिकं शूद्रविषयं
॥ अथैतमूर्ध्वपुंड्रादि ललाटे ब्राह्मणा भुवि॥ धारयिष्यंति ये मोहेन युगांते समुपस्थिते॥ इति वासिष्ठलैंगेन वचनाद्

·श्रु· ये॥ अश्रौतमिति विशेषितत्वेन नमसा श्रौतत्वात्॥ नहि श्रुतिषु विधानाभावादेकादश्यादेस्तस्यापि हि जेतरविषयत्वमि
तिचेन्न॥ वृत्यनुष्ठानस्य तावेत्यनुमितश्रुतेस्तत्र सद्भावात्॥ तर्ह्यनुमितश्रुतिसद्भावादूर्ध्वपुंड्रेप्यस्त्विति चेन्न॥ ए
१२ कादशीव्रतस्य कुत्राप्यनिषिद्धत्वादनुमितिश्रुतेः संभवात्॥ ऊर्ध्वपुंड्रस्य तु पुराणेषु बहुशो निषेधादनुमितश्रु
तिसद्भावस्य कल्पयितुमशक्यत्वात्॥ तथाहि पाराशरे॥ सांकनं पुंड्रांतरं निराक्रियते॥ ऊर्ध्वपुंड्रं त्रिशूलं च व
र्तुलं चतुरस्रकं॥ अर्धचंद्रादिकं लिंगं वेदनिष्ठो न धारयेत्॥ जन्मना लब्धजातिस्तु वेदपंथानमाश्रितः॥ पुंड्रांत
रं भ्रमाद्वापि ललाटे नैव धारयेत्॥ तिर्यक्त्रिपुंड्रं संत्यज्य श्रौतं पुंड्रांतरं भ्रमात्॥ ललाटे धारयन्मर्त्यः पतत्येव
न संशयः॥ नदाहयेद्विजन्मेषु न दहेद्बुक्मतवैकैः॥ शंकितोयः स्वदेहात्तं राजा राष्ट्रात्प्रवासयेत्॥ अतीतवपति
तानां हि स्वपचादीकनं नृणां॥ विधीयते न शुद्धानामतः शुद्धं न धांकयेत्॥ १॥ अपवादस्तं बंधिकं नमिश्चयेः॥
अध्यापने चाध्ययने श्रौतस्मार्तेषु कर्मसु॥ संभाषणे च संबंधे नाधिकारी वलांछितः॥ २॥ ननु तप्तमुद्रादि धारणस्य श्रौ १२
तत्वान्न निंदा न संगच्छते॥ तथाहि॥ योहवै श्लोकमौलेर्धर्माननुतिशतानो॥ मवत्रं धनेभिर्वैसहस्राः सहस्रारोमेभिर्नेभिनातस

तनूः॥सायुज्यं लोकतामाप्नोतीति॥तथा॥ चक्रं बिभर्त्ति वपुषाभितप्तं बलं देवानाममृतस्य विष्णोः॥स एति नाकं दुरितं
विधूय॥विशंति यद्यतयो वीतरागाः॥तथा चक्रक्रपरिशिष्टे॥अतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वहंतस्तत्समास
त॥इति चेच्छृणु॥तत्र योहवेदइति वचनं॥यातपथश्रुतिस्थमिति॥रामार्चनचंद्रिकाकारादिभिरुक्तं॥न चैतच्छतपथब्रा
ह्मणे अपलभ्यते॥किंच॥नेह विधिः श्रूयते॥अपि च॥पतितादिविषयकमेव॥श्रागुप्ताहृतस्मृतिबलात्॥न च स्मृत्या
श्रुतेः॥संकोचोऽनुपपन्न इति वाच्यं॥विशेषविषयिण्या स्मृत्या सामान्यश्रुतेः॥संकोचस्य सर्वसंमतत्वात्॥अन्य
था पतितस्याप्यग्निहोत्रप्रसंगात्॥कलौ च पिनरमेधाश्वमेधादेः प्रसंगाच्च॥तत्र यदि पतितानां कर्मानधिकारबोधक
स्मृत्या नरमेधाश्वमेधकावितिकलौ निषिद्धपरिगणनस्मृत्या च॥अग्निहोत्राश्वमेधादिश्रुतीनां संकोच इति ब्रूषे॥तर्हि
प्रकृतेपि तुल्यं॥एतेन चक्रं बिभर्तीत्यादिवचनमपि गतार्थं॥यदप्युक्तं॥ऋक्परिशिष्टमिति तन्न तत्रेदं परिशिष्टं॥किंतु स
मस्तकेप्यदृष्टे॥इति तावत्वैदिकेष्यो गृह्याणि॥किंच नास्य स्वदृष्टिमतो र्थः॥संभवति॥इदं त्वनुपजीव्येमोक्षैरित्थं
व्याख्यातं॥पवित्रं ते विततं ब्रह्मणस्पते॥प्रभुर्गात्राणि पर्येषि विश्वतः॥अतप्ततनूर्न तदामो अश्नुते॥ब्रह्मणः वेदस्य च
तुर्मुखस्य ब्राह्मणजातेर्वा पतेः रक्षकेति विष्णुसंबोधनं प्रभुस्त्वं विश्वतो विष्णोर्गात्राणि पर्येषि॥अंतर्यामितया व्या

शोषि॥ तादृशास्य ते तव पवित्रं सुदर्शनं॥ अर्थाच्छ्रुतेनेति लभ्यते॥ अततप्ततनूः असंस्कृतशरीरः आमः अदग्धपापस्तद्ब्रह्म
नाश्नुते॥ नचैतद्व्याख्यानं प्रामाणिकं॥ तस्मिन्नुदीचीनदर्शनपवित्रं वितन्वंति पवित्रं ते विततं ब्रह्मणस्पत इति वितन्य
मानमभिमंत्रयते यजमान इत्यापस्तंबसूत्रेण उद्गातृभिर्द्रोणकलशे वितन्यमानस्य पवित्रस्यानुमंत्रणे एतन्मंत्रेणेता
मंत्रविनियोगश्च॥ तथाच॥ हे ब्रह्मणस्पते सोमते तुभ्यं त्वं स्यावनार्थौ॥ इदं च आपवित्रं विततं इत्यर्थो भाष्यसंमतः॥ अथैव
कृच्छ्रचान्द्रायणादिना ऽतप्ततनुरसंस्कृतदेहः अत एव आमोऽपक्वोऽदग्धरागादिस्तद्ब्रह्म नाश्नुते नाप्नोतीत्यर्थः॥
अपि च॥ सोमस्य धारा पवते इत्युपक्रमात्॥ शोधंतो॥ अप्यजंतवः ऽस्कमरदर्शनात्॥ पवमानसोमो देवतेत्यनुक्र
मणिकावचनात्॥ पूर्वोक्तापस्तंबसूत्राच्च त्वदुक्तोर्थोऽसंगत एव॥ यदप्युक्तं विष्णुचक्रोदये॥ नारायणायुधैर्युक्तं
कृत्वात्मानं कलौ युगे॥ कुर्युस्ते युग्मकर्माणि मद्भक्त्या न्यसंशयं इत्यादि ब्रह्मपुराणवचनानीति॥ तान्यपि समूल
त्वे पूर्ववद्द्विजेतरविषयव्यवस्थापनेन गतार्थानि॥ स्कंदब्रह्मपुराणे दशमाध्याये॥ तप्तमुद्रां त्यजायहरि
णा निर्मितां पुरा॥ भूदेवस्तप्तमुद्राया चिह्नं कृत्वा विमूढधीः॥ इह जन्मनि शूद्रः स्यात्प्रेत्य श्वा च भविष्यति॥ इति स्थि
तम्॥ नारदीये॥ संतप्तशंखचक्राद्यैर्लिंगैरंकितविग्रहः॥ पतनं नरकप्राप्तिर्जायते नात्र संशयः॥१॥ यस्तु संत १२

शंखादिलिंगांकिततनुर्नरः ॥ स सर्वयातनाभोगी चांडालो जन्मकोटिषु ॥ २ ॥ द्विजं संतप्तशंखादिलिंगांकिततनुं नरः ॥ सं
भाष्य रौरवं याति यावदिंद्राश्चतुर्दश ॥ ३ ॥ चक्रांकिततनुर्यत्र तत्र को विप्र संविशेत् ॥ यदि तिष्ठेन्महापापी सहस्रब्रह्महा भवेत् ॥ ४ ॥ ग ग
स्नानरतो वापि श्मश्रुमेध्यरतोपि वा ॥ चक्रांकिततनुं दृष्ट्वा रौरवमुपगमश्नुते ॥ ५ ॥ लिंगांकिततनुं दृष्ट्वा पश्येत्सूर्यं नर
श्वर ॥ ६ ॥ हेमाद्रौ प्रायश्चित्तखंडे वायुपुराणे ॥ ब्राह्मणो यदि मोहेन तापयेद्वह्निमुद्रया ॥ स कर्महीनो वेदत्र सर्वेपाखं
डसंज्ञकः ॥ १ ॥ लिंगपुराणे ॥ शंखचक्रे तापयित्वा यस्य देहः प्रदह्यते ॥ स जीवन् कुणपस्त्याज्यः सर्वधर्मबहिष्कृतः ॥ आदित्य
पुराणे ॥ सर्वजस्य तनुं दग्ध्वा शंखचक्रादिभिः पृथक् ॥ न तस्य निष्कृतिर्दृष्टा स्नानदानजपादिभिः ॥ २ ॥ पृथ्वीचंद्रोदयादिनि
बंधेषु विष्णुः ॥ शंखचक्राद्यंकनं च गीतनृत्यादिकं तथा ॥ एकजातेरयं धर्मो जातु स्याद्विजन्मनः ॥ २ ॥ इत्यादिशातातपहा
रीतवाक्यानि द्रष्टव्यानि ॥ सूतसंहितायामपि ॥ वेदमार्गैकनिष्ठस्तु मोहेनाप्यंकितो यदि ॥ पतत्येव न संदेहस्तप्तमुद्रांतरा
दपि ॥ २ ॥ नांकनं विग्रहे कुर्याद्देवताध्यानमाश्रितः ॥ लांछिताश्च न संभाष्यान् स्पृश्यांश्च कदाचन ॥ २ ॥ न दर्शनीयास्ता
न् राजा देशात्क्षिप्रं प्रवासयेत् ॥ ३ ॥ यस्तु ॥ नानादेशसमुत्पन्ना ब्राह्मणाः क्षत्रिया विशः ॥ चक्रांकिताः प्रवेष्टव्या यावदागम
नान्ममेति वचनमुदाहरंति ॥ तस्य विनापि चं समुच्चयस्य त्रिषु तेषामपि चकारस्य सत्त्वेन चक्रांकिता इत्यस्य सर्वत्र तत्त्वयवि ।

शैषणत्वाभावेपि समुच्चयसंभवेन भस्माद्विविषयत्वमुचितमेव॥ किंच॥ तत्र चक्रदग्धादूतिपदाभावादिदं राजकीय
चिन्हरूपं किंचित्स्यादिति भाति॥ तस्मादूर्ध्वपुंड्रमंकनं च सति समूलत्वे द्विजेतरविषयमेव॥ एवं रुद्राक्षातिरिक्तफल
काष्ठादिमालाधारणमपि बोध्यम्॥ मुक्ताप्रवालादेर्धारणेच्छायां तु रुद्राक्षान्वितमेव बिभृयात्॥ मानं तूक्तं प्रागिति
संक्षेपः॥ इति श्रीमत्स्वामिसदानंदविरचिते शैवसुधाकरे ऊर्ध्वपुंड्रादिखंडनं नाम चतुर्थः किरणः॥४॥ अथ शिव
लिङ्गपूजनमाहात्म्यं॥ विद्येश्वरसंहितायां॥ बेरमात्रे तु सर्वत्र पूज्यंते देवतागणाः॥ लिंगे बेरे हि सर्वत्र कथं संपूज्यते शि
वः॥१॥ इत्थं शौनकादिभिः पृष्टे सूत उवाच॥ शिवो हि द्विविधः प्रोक्तो निष्कलः सकलस्तथा॥ निष्कलत्वान्निराका
रं लिंगं तस्य समं गतं॥२॥ सकलत्वात्तथा बेरं साकारं तस्य संगतं॥ अब्रह्मत्वाज्जीवत्वात्तथान्ये देवतागणाः॥२॥ सर्वे सक
लमात्रत्वाद्वंद्यंते बेरमात्रके॥ शिवस्योभयरूपत्वाल्लिंगे बेरे च पूज्यते॥३॥ बेरं प्रतिमा॥ तत्रैव शिवेनोक्तं॥ लिं
गे बेरे च मे तुल्यं भजतां लिंगमुत्तमं॥ तस्माल्लिंगं परं पूज्यं बेरादपि मुमुक्षुभिः॥१॥ महाभारते द्रोणपर्वणि अश्व
त्थामानं प्रति व्यासेनोक्तं॥ देवदेवस्त्वमेवात्मा अजेयो विष्णुरव्ययः सर्वरूपं भवं ज्ञात्वा लिंगेर्चयति तं प्रभुं॥१॥ १४
तत्रैव कृष्णार्जुनगौरवकथने॥ जन्मकर्मतपोयोगास्तयोस्तव च पुष्कलाः॥ याभ्यां लिंगेर्चितो देवस्त्वयार्चायां यु

गेस्थुते ॥ १ ॥ शिवरहस्ये ॥ इति मायां प्रयत्नेन कृतया सांगपूजया ॥ यत्फलं तत्फलं प्राप्नं व्यंगया लिंगपूजया ॥ १ ॥ इति
मायां यथाशास्त्रं सांगं शंकरपूजनं ॥ कर्तुं न शक्यते यस्मात् लिंगं पूज्यं प्रयत्नतः ॥ २ ॥ स्कांदे ॥ यो वा यामं अर्चयेद्वस्या पूर्णं
वर्षं शतं नरः ॥ लिंगमेकदिनं पूज्य सममेतन्न संशयः ॥ १ ॥ तत्रैव श्रीमो लिंगं समभ्यर्च्य पुरुषार्थचतुष्टयं ॥ प्राप्नोत्यत्र पु
मान्सद्यो नात्र कार्या विचारणा ॥ २ ॥ वायु० ॥ अयमेव परो धर्मस्त्विदमेव परंतपः ॥ इदमेव परं ज्ञानं शिवलिंगं यदर्च्यते ॥ २ ॥ ये
लिंगं सकृदप्यत्र पूजितं पार्वतीपतेः ॥ कुतो जन्मभयं तेषां संसारे दुःखसागरे ॥ ३ ॥ सौरपुराणे विष्णुं प्रति शिववाक्यं ॥ लिं
गे मां पूजय हरे लिंगरूपधरो ह्यहं ॥ १ ॥ वासिष्ठलैंगे ॥ जन्मांतरसहस्रेषु यत्कृतं नाधिमिर्द्विजाः ॥ नराणां क्षीणपापानां प्र
हालिंगार्चने मतिः ॥ १ ॥ यज्ञास्तपांसि दानानि तीर्थसेवा जपोत्सवं ॥ सर्वलिंगार्चनाद्धीनं फलायन भवेद्विजाः ॥ २ ॥ सर्वेषा
मेव धर्माणां महल्लिंगाराधनं वरं ॥ कीर्तिशिवयोः यत्र लिंगं कृत्वा व्रजंति ये ॥ ते कृतं मृन्मयं वापि नेमवं स्येवमूनुजः ॥ ३ ॥ शि
वरहस्ये ॥ विना लिंगार्चनं यस्य कालो गच्छति नित्यशः ॥ महाहानिर्भवेत्तस्य दुर्वृत्तस्य दुरात्मनः ॥ १ ॥ एकतः सर्वदानानि
व्रतानि विविधानि च ॥ तीर्थानि नियमा यज्ञा लिंगार्चा चैकतः स्मृता ॥ २ ॥ कलौ लिंगार्चनं श्रेष्ठं यथा लोके प्रदृश्यते ॥ त
था नास्तीति नास्त्यन्यत् शास्त्राणामेष निर्णयः ॥ ३ ॥ काशीखंडे ॥ लिंगार्चनविधानज्ञो लिंगार्चनरतः सदा ॥ यत्रतत्र वस

विज्ञेयः साक्षाद्रुद्रो हि मानवः ॥१॥ शिवरहस्ये ॥ गर्भधारणजः क्लेशो वा स्तन्मातुः सफलः स्मृतः ॥ यद्गर्भान्निसृतः पुत्रो लिं-
गार्चनरतो भवेत् ॥२॥ लिंगस्यार्चनमेवैकं कलौ सारतरं सुराः ॥ तदेव घोरसंसारमहासागरतारकं ॥३॥ इंद्रनीलमयं लिं-
गं विष्णुः पूजयते सदा ॥ इत्यादिवचनैर्विष्णोरपि लिंगाराधनं नियमेनैव श्रूयते ॥ किमुतान्येषां जीवानां ॥ तथा खलु श-
मेश्वरो वृषेश्वरो ॥ व्यासेश्वरो विन्ध्यकेश्वरो ॥ वसिष्ठेश्वरोऽगस्तीश्वर इत्यादीनि लिंगानि पृथिव्यां तैस्तैर्महापुरुषैः प्रति-
ष्ठितान्यर्चितानि च ॥ तत्तन्नामपूर्वाणि दृश्यंते ॥ तत्र हि बहून्युपाख्यानानि विस्तरतः श्रूयंते ॥ ततो लिंगाराधनमेव प्रति-
मापेक्षया श्रेष्ठमिति सिद्धं ॥ लिंगाभावे तु प्रतिमायामपि वा पूजनं कार्यं ॥ तदुक्तं विद्येश्वरसंहितायां ॥ लिंगं प्राधान्यतः पू-
ज्यं तथा बेरं प्रमाणकं ॥ लिंगाभावे तु वेरं स्यात् पूजायां स्थापने मम इति ॥१॥ लिंगान्युक्तानि शैवागमे ॥ वज्ररागकाश्मी-
रपद्मरागेंद्रनीलगोमेदविद्रुममौक्तिकराजतसौवर्णहीरकपारदबाणजमिश्रितानि पार्थिवमृत्सरोसरोत्तममिति ॥
वर्णादिभेदेन लिंगभेदमाह ॥ विद्येश्वरसंहितायां ॥ रसलिंगं ब्राह्मणानां सर्वाभीष्टप्रदं भवेत् ॥ बाणलिंगं क्षत्रियाणां म-
हाराज्यप्रदं शुभं ॥१॥ स्वर्णलिंगं तु वैश्यानां महाधनपतित्वदं ॥ शिलालिंगं तु शूद्राणां महाशुद्धिकरं शुभं ॥२॥ स्वीया-
भावेन्यदीयं तु पूजायां न निषिध्यते ॥ स्त्रीणां तु पार्थिवं लिंगं सभर्तृणां विशेषतः ॥३॥ विधवानां निवृत्तानां रसलिंगं वि-

शिष्यते॥ विधवानां च रत्नानां स्फाटिकं परिकीर्त्तितं॥४॥ बाणलिंगमथ वाप्यत्र स्कंदसंहितायां॥ नर्मदाजलमध्यस्थं
बाणलिंगमिति स्थितं॥ बाणासुरार्चितं लिंगं बाणलिंगं तदुच्यते॥१॥ तत्रापि॥ शिवं च बाणरूपेण तुलासाम्यं न जायते
॥ तदा बाणं समाख्यातं शेषं पाषाणसंज्ञितं॥२॥ नद्यां वा प्राप्यते यच्च यो यदा तत्तु पूज्यते॥ बाणलिंगं तदा विद्धि सर्वलिं-
गोत्तमोत्तमं॥३॥ स्फाटिकं त्रिविधं प्रोक्तं चंद्रसूर्यानलात्मकं॥ श्वेतं रक्तं च पीतं च क्रमात्प्रोक्तं हि जातिषु॥त्र॥ द्वयं लिंगमे
दव्यवस्थानुगं तत्र विप्रया लैंगे॥ कृते मणिमयं लिंगं त्रेतायां हेमसंभवं॥ द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे॥ सर्वव
र्णाश्रमाणां तु कलौ पार्थिवमर्हि॥ इति एवकारेण कलौ पार्थिवलिंगस्यैव सर्वसाधारण्येनोक्तत्वात्॥ लैंगे॥ रौद्रलिंगं
महाविष्णुर्ब्रह्मा पुष्टं च पार्थिवम्॥ यास्तचित्रं समभ्यर्च्य लब्धवान्परमं पदं॥१॥ ब्रह्मा सर्वजगत्कर्त्ता मृल्लिंगेऽर्चा कराव
नात्॥ भारतीमापमानाश्रुतं तस्मात्पूज्यं महीमयं॥२॥ मृन्मयं लिंगमभ्यर्च्य मनसा ततः सकलाः प्रभो॥ लब्धवंतः श्रियं पू
र्णां तस्मात्पूज्यं महीमयं॥३॥ यस्येंद्रियाणि पूजार्थं भवंति श्रमदेहिनः॥ कदाचिदपि वा शिवसफलं तस्य जीवितं॥
४॥ एककालं द्विकालं वा त्रिकालमथवा नरः॥ लिंगं महीजं संपूज्य शिवसायुज्यमाप्नुयात्॥५॥ शिवरहस्ये॥ शिव
लिंगसहस्राणां पूजया यत्फलं भवेत्॥ ततः शतगुणं पुण्यं लिंगे नादिसमुद्भवे॥१॥ ततः शतगुणं पुण्यं रत्नलिंगस्य

पूजने॥ रत्नलिंगसहस्राणां पूजयायत्फलं भवेत्॥२॥ ततः शतगुणं पुण्यं धातुलिंगस्य पूजने॥ धातुलिंगसहस्राणां पू-
जयायत्फलं लभेत्॥३॥ ततः शतगुणं पुण्यं बाणलिंगस्य पूजने॥ अनंतबाणलिंगानां पूजयायत्फलं लभेत्॥४॥ त-
तोनंतगुणं पुण्यं रसलिंगस्य पूजने॥ ततः शतगुणं पुण्यं मृत्तिकालिंगपूजने॥५॥ तस्मात्सर्वप्रयत्नेन लिंगं पूज्यं महीम-
यं॥ अकृत्वा पार्थिवं लिंगं योन्यदेवं प्रपूजयेत्॥६॥ वृथा भवति सा पूजा स्नानदानादिकं वृथा इति॥ सनत्कुमारसंहि-
तायां॥ यथा नदीषु सर्वासु गंगा श्रेष्ठा सरिद्वरा॥ तथा सर्वेषु लिंगेषु पार्थिवं श्रेष्ठमुच्यते॥१॥ यथा सर्वेषु मंत्रेषु प्रण-
वो हि महान्स्मृतः॥ तथा सर्वेषु लिंगेषु पार्थिवो हि महान्स्मृतः॥२॥ तथा॥ मृन्मयं लिंगमभ्यर्च्य पुरा लक्ष्मीप्रयत्नतः
॥ जाता सौभाग्यसंपन्ना महादेवप्रसादतः॥३॥ लैंगे॥ आबालोपनिषत्साध्वी मम ज्ञानस्य सिद्धये॥ प्रधानसाधना-
न्याह॥ द्विजानामादरेण तु॥१॥ अविमुक्तं मम क्षेत्रं मन्नामपरमं शुभं॥ शतरुद्रीयजाप्यं च तथा संन्यासमुत्तमं॥२
॥ भस्मनोद्धूलनं चैव त्रिपुंड्रस्य च धारणं॥ रुद्राक्षधारणं साक्षात्तथा पार्थिवपूजनं॥३॥ भस्मसंपादनं ध्यानं म-
मैव परमस्य च॥ एतानि साधनान्याहुः प्रधानानि मम प्रिये॥४॥ इदं च शिवपूजनं नित्यं॥ तदुक्तं स्कांदे॥ किं वेदैः॥ किं २६
तत्र शास्त्रैः किं तपोभिर्व्रतैः॥ शिवः संपूज्यतां नित्यमुपदेशोयमुत्तमः॥१॥ शिवधर्मे॥ भक्तो वैकमनाः पू-

त्यायावज्जीवं प्रतिज्ञया ॥ अर्चयेत्तु महादेवं तत्पन्नोपि सदा बुधः ॥ २ ॥ इत्यादौ नित्यं यावज्जीवं सदेति श्रवणात् ॥ प्रकरणे ऽप्यवाय श्रवणाच्च ॥ तथाह
शिवरहस्ये ॥ शिवलिंगमसंस्पृश्य योऽश्नुते मोहसंगतः ॥ स याति नरकं घोरं यावच्चंद्रदिवाकरं ॥ २ ॥ पाद्मे ॥ ये न पूज
यंते लिंगं ब्रह्मादीनां प्रकाशकं ॥ आत्मवित्सर्ववेत्तापि चतुर्वेदः पशुस्तु सः ॥ २ ॥ ईशानसंहितायां ॥ यस्य नास्ति
गृहे नित्यं शिवलिंगार्चनं शिवे ॥ तद्गृहं चंडि चंडालगृहमेव न संशयः ॥ २ ॥ ॐकारमाहात्म्ये ॥ वरं वंध्या मारी वरमा-
पितृणां मेरुपतनं वरं ॥ मृत्युर्जातो तदनु दिवसे वा कलिप्रवेशः ॥ वरं डिंभो जातो कटिति जनयित्री हि मरणे न तु श्रेयः
शैवेतरकुसुमसंघैर्विहरणं ॥ २ ॥ तथाह बृहज्जाबालोपनिषदि ॥ अहरहः शिवलिंगमनभ्यर्च्य नाश्नीयात् ॥ फल
मन्नमन्यद्वा ॥ यद्यश्नीयाद्रेतो मदीमचेत् नापः पिबेत् यदि पिबेत् मूत्रपो भवेत् ॥ अमादेनैकदा लिंगमनभ्यर्च्य भुंक्तान्नो
जयित्वा यावकेन त्र्यहं वा पयसा गव्यान्यपि पंचसंभृत्य जले रुद्रस्थाने वा जपेत् ॥ त्रिवारं शतरुद्रीयमादित्यं पश्य
न्न निष्प्रायश्चित्तं कर्म ततो रौद्रैरेव मंत्रैर्भोजनं कुर्यात् ततो भोजयित्वा ब्राह्मणान् पूतो भवति अन्यथा पूर्वेतो यातना
नश्नुते ॥ २ ॥ जननाशौचे तथा शावाशौचे पि शिवार्चनं न त्याज्यं ॥ किंतु स्पर्शरहितं कार्यं ॥ तदुक्तं स्कांदे ॥ जनना-
शौचमध्येपि कर्तव्यं शिवपूजनं ॥ शावाशौचेपि कर्तव्यं विना स्पर्शं प्रयत्नतः ॥ २ ॥ शांकरार्चनभक्ता ये तु द्विजो

नाद्यो नंदीशनायक॥ अस्यत्रीहीव मांशार्थं सहस्तकांतेऽयमलतः॥ २॥ रौद्रेगणे बहुगणा कार्यो होमो रौद्रैः सहस्रकं
॥इस्वर्वो जायते यस्मात्तस्मात्तु त्रिविधपूजनं॥ ३॥ कर्तव्यं मानसं नित्यं दृष्ट्वा हीशं प्रयत्नतः॥ दृष्ट्वा हि समतीते तु स्नात्वा स्ना
नं यथाविधि॥ ४॥ शिवलिंगार्चनं कार्यं हि जस्त्रीभिर्द्विजैरिव॥ होमोयं पुरुषाणां तु स्त्रीणां तु न कदाचन॥ ५॥
इति श्रीमत्स्वामिसदानंदविरचिते शैवसुधाकरे श्रीमल्लिंगपूजोत्कर्षवर्णनं नाम पंचमः किरणः॥ ५॥ ॥
यथानंत्योपचारैस्तु षोडशैः श्रद्धयायुतः॥ पूजयेत्पार्थिवं लिंगं शैवो भक्तिविधिना द्विजः॥ १॥ षोडशैरित्यार्थयु
योगः॥ षोडशोपचाराश्चोक्ता लैंगे॥ आवाहनासने पाद्यमर्घ्यमाचमनीयकं॥ स्नानं वस्त्रोपवीतं च गंधपुष्पे च धूप
कं॥ दीपमन्नं नमस्कारः प्रदक्षिणविसर्जने॥ २॥ आवाहनं अभिव्यक्त्यनुसंधानं॥ विसर्जनं नाम निजरूपेणा
वस्थानं॥ तदुक्तं कालोत्तरे॥ आवाहनमभिव्यक्तिर्निर्गमनो वा विसर्जनं॥ एवं दिने दिने देवं पूजयेदंबिकापतिं॥ २॥
एवमावाहनविसर्जनयोर्बाणलिंगादावपि संभवात्॥ तत्र प्रतिष्ठावाहनविसर्जनयोरभावेपि न षोडशोपचा
रपूजनवैकल्यं॥ यद्वा॥ ध्यानं चासनं पाद्यमर्घ्यमाचमनीयकं॥ स्नानं वस्त्रोपवीतं च भूषणानि तथैव च॥
गंधं पुष्पं तथा धूपं दीपमन्नं निवेदनं॥ प्रदक्षिणनमस्कारौ ह्युपचाराः षोडश॥ इति स्कांदे स्मृताः॥ षोडशोप २१

चाराबोध्या॥ सिद्धांतसारे॥ पूजाभेदेनयजनंपंचधापरिकीर्तितं॥ आराधनार्चनेपूजायागोहोमेतिपंचधा॥१॥
आराधनंतुशीपांनमुनीनांमुक्तिदायकं॥ अर्चनंस्याद्बिप्राणांतुमुमुक्षोर्मुक्तिदायकं॥२॥ पूजोत्सवाभ्यांविप्राणांग्राम
शैवानांसौख्यदा॥ यागोनृपसंततेःक्षेत्रराज्यराष्ट्रसमृद्धिकृत्॥३॥ विप्रभोजनपर्यंतस्यादर्हसवेशांतिदा॥ इत्थंपंचविधं
क्षेत्रैकभूपवारप्रभेदतइति॥४॥ शैवागमेतूपचाराएतावंतःएवोक्ताः॥ गंधःपुष्पंचधूपंचदीपमन्ननिवेदनं॥ तां
मूलंचनमस्कारः प्रदक्षिणसमापने॥१॥ अत्राग्रासेनषड्विंशोपचारैः पूजनंकार्यं॥ अभिषेकाक्षतमधुच्छिद्रगंध
सुगंधमवाप्नुते॥ आयुर्वृद्धिः पुष्पदानात्पादार्घ्यमवाप्नुते॥१॥ दीपात्ज्ञानमवाप्नोतिनैवेद्याद्भोगमाप्नुयात्॥ नस्मात्ता
नादिवस्त्रंचपूजनेनप्रसाधयेत्॥२॥ अत्यशक्तेनतुविंशिरवोपचारैः पूजनंकार्यं॥ तदुक्तंसौरसंहितायां॥ अभिषे
कश्चनैवेद्यंनमस्कारस्तथैवच॥ एतावदेवकर्तव्यंअशक्तेनप्रयत्नतः॥१॥ वायवीयसंहितायांतु॥ अत्यशक्तस्यु
पुष्पमात्रसमर्पणमुक्तं॥ पाद्यादिमुखवासांतमर्घ्यंतंवापिसंकटे॥ पुष्पविक्षेपमात्रंवाकुर्याद्भावपुरःसरं॥१॥ तावतै
वदोषविवर्जिता॥ अयललभ्यासर्वेषांमुक्तिमुक्तिफलप्रदा॥१॥ तत्राप्यशक्तानांस्वहृदयेचिंतनमात्रमुक्तं॥ त्रिकाली

तायां ॥ उदक्षिणस्तथा प्राङ्मुखो पियः स्नाते चिंतयेच्छिवं ॥ गच्छन्समुपविष्टो वा तस्याभीष्टं प्रयच्छति ॥ ४ ॥ इति श्रीमत्स्वामिसदा-
नंदविरचिते शैवसुधाकरे उपचारनिरूपणं नाम षष्ठः किरणः ॥ ६ ॥ अथ जलानि स्कांदे ॥ नद्याः समुद्रगामिन्याः नदाद्वा
स्वयमाहृतं ॥ वस्त्रपूतं च शीतं च विशिष्टं शिवपूजने ॥ १ ॥ काञ्चीखंडे ॥ वस्त्रपूतैर्जलैर्लिंगं स्नापयित्वा नरामराः ॥ लभन्त्य-
मेधजं नित्यं पुण्यं प्राप्नोति माप्नोति मानवः ॥ वर्ज्यानि तत्रैव ॥ स्पृष्टानीतं स्त्रियानीतं वामहस्तात्स्रुतं तथा ॥ अन्यपूजावशि-
ष्टं च जलं त्याज्यं शिवार्चने ॥ १ ॥ वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलं ॥ अवर्ज्यं जाह्नवीतोयं तुलसीपद्मबिल्वकं ॥ २ ॥ सि-
द्धांतशेखरे ॥ कलुषं कृमिसंमिश्रं नेष्टं पल्वलोदकं ॥ अम्बुद्भूतलस्थं च शिलागर्तजलं च यत् ॥ सदा छायायुतं त्या-
ज्यमंत्यजातिनिषेवितं ॥ इत्यादिदोषसंयुक्तं वर्ज्यं तोयं शिवार्चने ॥ ३ ॥ जलसंग्रहणं कुर्यात् दिवा चोषसि नो निशि ॥ ॥
इति श्रीमत्स्वामिसदानंदविरचिते शैवसुधाकरे जलोत्कर्षवर्णनं नाम सप्तमः किरणः ॥ ७ ॥ अथाभिषेकः सनत्-
कुमारसंहितायां ॥ केवलेनोदकेनैव स्नापनं मे भवेत्सदा ॥ गंधोदकं शतगुणं पंचगव्यं ततोऽधिकं ॥ तस्माच्छतगुणं क्षीरं १८
सहस्रं कापिलं भवेत् ॥ ततः शतगुणं प्रोक्तं सर्पिषा स्नानमेव च ॥ २ ॥ कपिलासंभवेनैव सर्पिषा स्नापयेच्छिवं ॥ दध्ना-
भिषेचितस्याहमपराधान्बहूनपि ॥ ३ ॥ अभिषेकपात्राण्युक्तानि लैंगे ॥ सुवर्णकलशेनाथ तथा वै राजतेन च ॥

ताम्रेण कलशेनाथ पालाशेन दलेन वा ॥ शंखेन मृन्मयेनाथ शस्त्रोविहितेन कुंभेन वा ॥ सकूर्चेन सपुष्पेण स्नापयेन्मंत्रपूर्व-
कमिति ॥ यत्तु वर्ज्ययेच्छिवपूजायां शंखस्तोयं विशेषतः ॥ अत्र तुल्यबलविरोधाद्विकल्पः ॥ ३ ॥ द्रव्याभिषेकः ॥ इति श्री-
मत्स्वामिसदानंदविरचिते शैववसुधाकरे अभिषेकोत्कर्षणं नाम अष्टमः किरणः ॥ ८ ॥ अथ गंधाः ॥ लिंगस्य लेपनं कु-
र्याद्दिव्यगंधैर्मनोरमैः ॥ वर्षकोटिशतं दिव्यं शिवलोके महीयते ॥ १ ॥ सौरपुराणे ॥ सुगंधलेपनात्पुण्यं द्विगुणं चंदनस्य च ॥
चंदनाद्वागरोर्ह्येयं पुण्यमष्टगुणाधिकं ॥ १ ॥ कृष्णागरोर्विशेषेण द्विगुणं फलमिष्यते ॥ तस्माच्छतगुणं पुण्यं कुंकुमस्य
विधीयते ॥ २ ॥ स्कांदेपि ॥ चंदनागरुकर्पूरनाभिरोचनकुंकुमैः ॥ लिंगमेतैः समालिप्य गाणपत्यमवाप्नुयात् ॥ ३ ॥ अ-
नुलेपनप्रमाणं लैंगे ॥ अनुलिंपेच्च लिंगं तु पंचविंशात्पलेन वै ॥ ॥ इति श्रीमत्स्वामिसदानंदविरचिते शैववसुधाकरे गं-
धोत्कर्षवर्णनं नाम नवमः किरणः ॥ ९ ॥ अथाक्षताः ॥ शिवरहस्ये ॥ अर्चयिष्यति यो नित्यमखंडैः शालितंदुलैः त-
न्मूर्ध्नि तु तिष्ठामि प्रतिज्ञेयं मम प्रिये ॥ १ ॥ यस्तु नित्यं तिलैः कृष्णैः श्वेतैर्वा पूजयिष्यति ॥ तन्मूर्ध्नि तु तिष्ठामि प्रतिज्ञेयं मम
प्रिये ॥ प्रियंगुतंदुलैर्नित्यं यो मामभ्यर्चयिष्यति ॥ तन्मूर्ध्नि० ॥ ३ ॥ इत्यक्षताः ॥ इति श्रीमत्स्वामिसदानंदविरचिते शैववसु-
धाकरे अक्षतोत्कर्षनिरूपणं नाम दशमः किरणः ॥ १० ॥ शिवपूजनं सति संभवे बिल्वपत्ररहितं न कार्यं ॥ तदुक्तमादि-

स्कपुराणे॥ गोमयाद्दुःस्थितः श्रीमान् बिल्ववृक्षः शिवप्रियः॥ तत्रास्ते बिल्वहस्ता श्रीः श्रीवृक्षस्तेन वोच्यते॥१॥ बिल्वपत्रैर्वि
ना पूजां यः करोति शिवस्य च॥ स याति नरकं घोरं यावदिंद्राश्चतुर्दश॥२॥ इदं श्रुतिनिंदावाक्यं॥ नहि निंदेति न्यायेन बिल्वप
१९ त्रसहितशिवार्चनस्यावश्यकत्वबोधकं॥ न तु तद्रहितपूजाया निषेधतात्पर्यवत्॥ पूर्वोदाहृतानेकवाक्यविरोधात्॥
ब्रह्मांडपुराणे॥ निःस्यमाईरनाविद्धैर्बिल्वपत्रैः सदाशिवं॥ पूजयत्सर्वदा देवं तस्मान्मा प्रमदोऽभव॥१॥ सौरपुराणे॥ एकं
बिल्वदलं रम्यं मद्भक्तेनार्पितं मयि॥ अनंताघहरं नूनं सत्यमेवोच्यते मया॥१॥ दर्शनाद्बिल्ववृक्षस्य स्पर्शनाद्वंदनादपि
॥ अहोरात्रकृतं पापं नश्यते नात्र संशयः॥२॥ ब्रह्मांडे॥ पंचाक्षरेण मंत्रेण बिल्वपत्रैः शिवार्चनं॥ करोति श्रद्धया य
स्स स गच्छेदैश्वरं पदं॥१॥ बिल्वपत्रच्छेदने निषिद्धदिनान्याह॥ लैंगे॥ अमारिक्तासु संक्रांतावष्टम्यामिंदुवासरे॥
बिल्वपत्रं न च छिंद्याच्छिंद्याच्चेन्नरकं व्रजेत्॥१॥ नूतनालाभे छिन्नैः पर्युषितैरपि पूजनं कार्यं॥ तदुक्तं शिवरहस्ये
छिन्नैः पर्युषितैः पत्रैरपि बिल्वस्य नारद॥ पूजयेद्गिरिजानाथमलाभे यत्नतो नरः॥१॥ तथा॥ तुलस्या बिल्वपत्रेण तु
ञेषु च सर्वेषां न पर्युषितदोषोस्ति मालाकारगृहे तथा॥२॥ सिद्धांतशेखरे॥ पर्युषिता न तुलसी मासमात्रं न दुष्यति॥
चत्वारि शाहिनं बिल्वं कमलं त्रिदिनं स्मृतं॥१॥ केतकी शतपत्रं च बकुलं पंचदिनं स्थितं॥ पक्षमात्रं दमनकोऽवस्थितो १९

पिनद्युष्यति॥२॥ जातिपत्रैः फलैश्चापि तथा कुंकुमकेसरैः॥ सुगंधपुष्पैर्यत्नेन सदा पूज्यो महेश्वरः॥३॥ नैवं पर्युषितत्वं च स्थितं
संवत्सरावधि॥४॥ मालत्याः पर्युषितत्वं नास्ति सदाह वसिष्ठः॥ अन्यत्र तोयं पर्युषितं वर्ज्यं पैत्र्यकर्मणि॥ प्रथितानि च पुष्पा
णि नैव पर्युषितानि वै॥ शुष्कपर्युषिता लाभे अर्पितान्यपि शस्त्राणि॥ तदुक्तं स्कांदे॥ अर्पितान्यपि बिल्वानि प्रक्षाल्यापि च पु
नः पुनः॥ शंकरायार्पणीयानि न नवानि यदि क्वचित्॥ खंडितं बिल्वपत्रं च यो हरस्त्वर्पयेच्छिवे॥ कुत्रहं नियमेनेति वाहु जीवा
लत्वात्खिनः॥ इदं त्वखंडितालाभे वेदितव्यम्॥ नारदीये॥ सर्वेभ्यश्चैव पत्रेभ्यो बिल्वपत्रं विशिष्यते॥ दिने दिने तु दातव्यं शोधयि
त्वा पुनः पुनः॥ समरात्रमतिक्रम्य निर्माल्यत्वं प्रपद्यते॥ पाद्मे॥ चूर्णीकृतान्यपि प्राप्तानि बिल्वपत्राणि वैदिकाः॥ संपाद्य पू
जयेल्लिंगं नवालाभे विचक्षणाः॥ बिल्वपत्रमुपक्रम्य॥ स्कांदे॥ वामपत्रे स्थितो ब्रह्मा पद्मनाभश्च दक्षिणे॥ मध्यपत्रे स्थि
तो रुद्रः साक्षात्संसारमोचकः॥१॥ इतरे तु नागे स्थिता यज्ञाः सर्वभक्तानां निषेधकाः॥ इंद्राद्यो लोकपालाः पृष्ठे ताः परिकीर्तिताः॥
२॥ पूर्वभागे मृतं तस्य स्तंभे देवैर्ब्रह्मादिभिः पुरा॥ अतो वै पूर्वभागेन पूजयेद्गिरिजापतिं॥३॥ तत्रैव॥ पुष्पमूर्ध्वमुखं योज्यं पत्रं
योज्यमधोमुखं॥ फलं तु संमुखं योज्यं यथोत्पन्नं तथार्पयेत्॥ लैंगे॥ मणिमुक्ताप्रवालैस्तु रत्नैरप्यर्चनं कृतं॥ न गृह्णाति विना
देवि बिल्वपत्रैर्वरानने॥ बिल्वपत्रसंख्योक्ता॥ वायवीयसंहितायां॥ श्रीपत्रोत्पलपद्मानां संख्या साहस्रिकी मता॥ शुक्लैक म

परासंख्या ह्यातम शोसरं द्विज ॥ १ ॥ पुष्पांतरेन नियमो यथालाभं निवेदयेत् ॥ शिवरहस्ये ॥ धूपदीपोपहारादेरभावेपि द्विजोत्तम ॥ सां
गं बिल्वदलैरेव न विष्यति शिवार्चनं ॥ २ ॥ बिल्वपत्रार्थमन्यत्तु नव स्येवन सर्वथा ॥ म्लेच्छानीतैः क्रयक्रीतैर्बिल्वपत्रैर्न मार्चनं ॥
यः करोति स मूढात्मा रौरवं नरकं व्रजेत् ॥ २ ॥ तत्रैव ॥ बिल्वपत्रैर्महादेवं स्वाहृतैरेव कोमलैः ॥ यः पूजयति यत्नेन पदं प्राप्नोति शां
करं ॥ १ ॥ अथ पुष्पाणि ॥ आरण्यसंभवैः पत्रैः पुष्पैर्वा गिरिसंभवैः ॥ अपर्युषितनिश्छिद्रैरस्रैर्जन्तुवर्जितैः ॥ १ ॥ आत्मारा
मोद्भवैरेव पुष्पैः संपूजयेच्छिवं ॥ अरत्नैरिति रत्नपुष्पनिषेधो रत्नोत्पलकर्णिकारव्यतिरिक्तविषयः ॥ रक्तोत्पलैः क
र्णिकारैर्यः करोति ममार्चनं ॥ सम्राप्य वा न मनुष्येषु ममस्यान्प्रियकृत्तमः ॥ इति गारुडे तयोर्विधानात् ॥ छिद्रिभ्रैः कर्णि
कारैश्च पूजयेन्नांबरानने ॥ इति नारदीयाच्च ॥ स्वाहृतैरेव पूजनं कार्यं ॥ तदुक्तं शिवरहस्ये ॥ स्वयमुत्पाद्य पुष्पाणि यः
स्वयं पूजयेच्छिवं ॥ तानि साक्षात्सुगृह्णाति देवदेवो महेश्वरः ॥ १ ॥ उत्पादयेत्स्वयं आहृत्येत्यर्थः ॥ स्वारामसंभवैः पुष्पैर्मध्य
मं विपिनोद्भवं ॥ विक्रीतमधमं पुष्पपत्रं च शिवपूजने ॥ २ ॥ स्मृत्यंतरेपि ॥ समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत्
॥ म्लेच्छानीतैः क्रयक्रीतैः कर्म कुर्वन्पतत्यधः ॥ १ ॥ स्वयमाहरेदिति नियमो द्विजानामेव ॥ न तु शूद्राणां स्त्रीणां च ॥ श्रोत्रि
यपदोपादानात् ॥ छेदनं पत्रपुष्पाणां स्त्रीभिः शूद्रजनैस्तथा नकार्यं सर्वथा राजन्निमाहुर्भगवान्मनुरिति लैंगात् ॥ एवं

च॥ धर्मार्जितधनक्रीतैः॥ पुष्पैः कुर्यात्करार्चनं॥ उद्धरिष्यत्यसंदेहं स स पूर्वांस्तथापरान्॥ इतिवचनमपि स्त्रीशूद्रपर
मेव॥ कूर्मपुराणे॥ गृहीत्वान्यानि पुष्पाणि देवार्चनविधौ द्विजैः॥ अन्यांशमेकं वान्येवं नो गार्थेन कदाचन॥ १॥ देवताग्रे द
त्तं पुष्पमस्तेयं मनुरब्रवीत्॥ याचितैः परपुष्पाद्यैर्यः करोति सुरार्चनं॥ वृथा भवति सा पूजा स्यपराधी भवेन्नरः॥ २॥ दे
सः॥ देवोपरि धृतं यच्च वामहस्तधृतं च यत्॥ अधोवस्त्रधृतं यच्च जलांतः क्षालितं च यत्॥ १॥ देवतास्तं भवेद्दुष्टं वस्तु
ष्पं निर्माल्य तां व्रजेत्॥ समित्पुष्पकुशादीनि वहंतं नाभिवादयेत्॥ २॥ तद्धारी नैव मन्यान् हि निर्माल्यं तद्वेत्ययोः॥ इ
ति॥ बिल्वापामार्गजातीतुलसिशमिशताकेतकीभृंगदूर्वा॥ मंदारांभोजदर्भा मुनितगरतिलब्रह्मकल्हारमल्लीः॥
चंपासारातिकुंदा दमनमरुवका बिल्वतो हानि त्रिंशात्॥ त्रिंशाद्येकाशिशायोदधिनिधिवसुतुर्यमानूयरदा॥
१॥ अहानि त्रिंशात्॥ मल्लीः शाङ्घोदधीव्यन्नार्षलमेव गतिः॥ अस्यार्थः॥ बिल्वतः बिल्वादारभ्य मरुवकांत चतुर्विंश
तिः॥ पत्रपुष्पाणि क्रमेणैतदुक्तसंख्याकान्यहानि तावद्दिवसपर्यंतं पर्युषितानि न भवंति॥ तदुत्तरं पर्युषितानि भवंति॥ यथा
बिल्वस्त्रिंशद्दहानि॥ न०॥ न पर्युषितः॥ अपामार्गस्त्रिंशात्॥ न०॥ जातीत्रीणि॥ ३॥ तुलसी एकं॥ १॥ शमी अरिः॥ ६॥ श
तावरी राशिः॥ १२॥ केतकी उदधिः॥ भृत्यः भृंगराजः निधिः॥ ९॥ दूर्वा वसुः॥ ८॥ मंदारः नः॥ १॥ अंभोजं नः॥ १॥ दर्भाः

यमः ॥ ३ ॥ पुनरपि मुनिः आगस्तिः त्रिंशत् ॥ ३० ॥ तगरः त्रिंशत् ॥ ३० ॥ तिलः ॥ ३ ॥ ब्रह्मपलाशः ॥ १ ॥ कल्हारः ॥ ६ ॥ मल्ली
॥ १ ॥ चंपा ॥ ७ ॥ अम्लारातीश्वेतः ॥ ५ ॥ कृष्णाख्य ॥ ८ ॥ कुंभः ॥ १ ॥ दमनकः ॥ मरुवकः ॥ ३ ॥ निर्ग्रंथसिन्धौ तु ॥ बिल्वापा
मार्गजातीतुलसिद्वाभिशताधैतकीभृंगदूर्वाग्न्यं नोजाहिद मांमुनितिलतगरब्रह्मकल्हार मल्लीः ॥ चम्पाम्लारातिकु-
आदमनमरुल्वकाबिल्वतोऽह्वानिशारलाखिंशाख्यकार्यरीशांदधीत्यादिः पाठः ॥ मन्दोमन्दारः ॥ अहीनांगकेशरः ॥ कुम
सीपाटला ॥ दूर्वारकादशा ॥ उदधिप्रस्तार ॥ इति व्याख्यापितमेव ॥ स्कांदे ॥ संहत्यैरन्यकुसुमैः पूजनीयो महेश्वरः ॥ सं-
तरीभिः पूजनीयो बृहतीकुसुमैः शिवः ॥ १ ॥ अलाभे तु सुपुष्पाणां पत्रादीनि समर्पयेत् ॥ पत्रादीनामलाभे तु नमस्कारः प्रशस्यते ॥ पु
ष्पपत्राभावे जाप्यादि पुण्यं ॥ तदुक्तं लैंगे ॥ प्रत्येकं पुष्पपुष्पेण दशासौवर्णिकं फलं ॥ स्त्रिग्ध्रनूपद्मार्द्रतद्वहि-
गुणं भवेत् ॥ २ ॥ मात्स्ये ॥ यस्य हस्तस्य पत्राणि पुष्पाणि च फलानि च ॥ महादेवो पयुक्तानि सो पियाति परांगतिं ॥ १ ॥
सिद्धांतशेखरे ॥ शैवागमे तु सर्वत्र प्रशस्तं करवीरकं ॥ तस्य मध्ये स्थितो देवो लिंगाकारः सदीवकः ॥ १ ॥ अर्पितं त-
न निर्माल्यं पुनः शेषपत्रं वर्जयेत् ॥ करवीरसहस्रेभ्यः शमीपुष्पं विशिष्यते ॥ २ ॥ शमीपुष्पसहस्रेभ्यो ह्येकं धत्तूरकं
वरं ॥ धत्तूरकसहस्रेभ्यो बृहत्पुष्पं विशिष्यते ॥ ३ ॥ बृहत्पुष्पसहस्रेभ्यो ऽप्यपामार्गो विशिष्यते ॥ पुष्पपुष्करके वि ॥ पुष्प

स्वसकंटकत्वादपामार्गस्य पत्रं प्रशस्यं ॥५॥ अपामार्गसहस्रेभ्यः श्रीमन्नीलोत्पलं वरं ॥ नीलोत्पलसहस्रेण यो मालां
संप्रयच्छति ॥ शिवाय विधिवद्भक्त्या तस्य पुण्यफलं शृणु ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥६॥ वसे
च्छिवपुरे श्रीमान् शिवतुल्यपराक्रमः ॥ बृहतीकुसुमैर्नित्यं यो लिंगं समर्चयेत् ॥७॥ गवामयुतदानस्य फलं प्राप्य
शिवं व्रजेत् ॥ मल्लिकोत्पलपुष्पाणि नागपुन्नागचंपकं ॥८॥ अशोकं श्वेतमंदारकर्णिकारबकानि च ॥ करवीरार्कमंदार
शमीतगरकेसरं ॥९॥ कुशापामार्गकुमुदकदंबबकुलान्यपि ॥ पुष्पैरेतैर्यथालाभं पूजयेच्च सदाशिवं ॥ करवीरसमा ज्ञे
या जाती विजयपाटली ॥ श्वेतमंदारकुसुमं सितपद्मेन तत्समं ॥१०॥ नागचंपकपुन्नागा धत्तूरकुसुमैः समाः ॥ अथ वर्ज्या
नि सौरपुराणे ॥ केशकीटापविद्धानि शीर्णपर्युषितानि च ॥ स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ॥१॥ उग्रगंधानि पु
ष्पाणि म्लानानि तानि वर्जयेत् ॥ एरंडपत्रैश्च तथा वासोभिः कुत्सितात्मभिः ॥२॥ आनीतं नार्पयेच्छंभोः प्रमादादपि दे
वकृत् ॥ कार्तिके सोमवारे विशेषतो धत्तूरपुष्पेण पूजा कार्या ॥ तदुक्तं शिवरहस्ये ॥ एकं वापि तु धत्तूरं कार्तिके सोम
वासरे ॥ यदि दद्यात्ममप्रीत्या मयि लीनो भविष्यति ॥१॥ पुष्पसमर्पणप्रकारश्लोकः प्रयोगपारिजाते ॥ मध्यमाना
मिकामध्ये पुष्पं संगृह्य पूजयेत् ॥ अंगुष्ठतर्जनीभ्यां निर्माल्यमपनोदयेत् ॥१॥ नारदीये ॥ तुलसीदलमात्रेण यः

करोति शिवार्चनं॥ कुलैकविंशमुद्धृत्य शिवलोकमहीयते॥ १॥ वन्यपुष्पाणां शास्त्यमुक्तं॥ पाद्मे॥ शिवगीतायां॥ वन्ये
षुया दृशी प्रीतिर्वर्त्तते परमेशितुः॥ तस्मै प्रपिनास्त्येव ग्रामजे प्रपिता दृशी॥ १॥ इति श्रीशैवरत्नाकरे बिल्वादिपत्रपुष्पो
त्कर्षनिरूपणं नाम एकादश किरणः॥ ११॥ अथ धूपः॥ वायवीयसंहितायां॥ चंदनागरुकर्पूरकुष्ठगुग्गुलचूर्णकैः॥ घृते
न मधुना चैव सिद्धो धूपः प्रशस्यते॥ १॥ सौरपुराणे॥ गुग्गुलं घृतसंयुक्तं साक्षाद्ध्लादति शंकरः॥ गोमूत्राद्गुग्गुलुर्जातः
सुगंधिः प्रियदर्शनः॥ १॥ स धूपः सर्वदेवानां शिवस्य च विशेषतः॥ लैंगे॥ कृष्णागरुं सकर्पूरं धूपं दद्याच्छिवाय वै॥ मेरं
तर्पेणपासार्द्धं तस्य पुण्यमनंतकं॥ १॥ इति श्रीमत्स्वामिसदानंदविरचिते शैवरत्नाकरे धूपोत्कर्षवर्णनं नाम द्वाद-
शः किरणः॥ १२॥ अथ दीपः॥ वायवीसंहितायां॥ कपिलासंभवेनैव घृतेनातिसुगंधिना॥ नित्यं प्रदीपिता दीपाः
शस्ताः शंकरपूजने॥ १॥ शस्ता इत्यनेन कपिलाघृतासंभवे कपिलाव्यतिरिक्तानां गवां घृतेनापि दीपाः कार्या इति बोधि
तं॥ भविष्ये॥ घृतदीपप्रदानेन शिवाय शतयोजनं॥ विमानं लभते दिव्यं सूर्यकोटिसमप्रभं॥ १॥ घृताऽसंभवे तु॥ तिलजे
तैलेन वा कार्यो दरिद्रेण विपश्चिता इति॥ अतसीतैलेनापि कार्यस्तत्पुक्तं॥ नागरखंडे॥ अतसीतैलयुक्ता ये दीपा दत्ताः
॥ शिवालये॥ दश पूर्वे दशापरैस्ते समेताः शिवालये॥ १॥ वसंतीति शेषः॥ शिवालये कैलासे॥ कौसंभते २२

सेनापि दीपः कार्यस्तदुक्तं ॥ स्कांदे ॥ कुंभस्य घृततैलेन दीपा दत्ताः शिवालये ॥ ज्ञानिनस्ते भविष्यंति दीपदानफलेन हि ॥ १ ॥ कार्त्तिक्यां शिवाग्रे दीपदानमतिप्रशस्तं ॥ तदुक्तं तत्रैव ये दीपमालां कुर्वंति कार्त्तिक्यां श्रद्धयान्विताः ॥ यावत्कालं प्रज्वलंति दीपास्ते लिंगमग्रतः ॥ १ ॥ तावद्युगसहस्राणि दाता स्वर्गे महीयते ॥ अत्र कालशब्दस्य क्षणादिपरत्वेन योजनीयः ॥ लिंगमिति षष्ठ्यर्थे द्वितीया ॥ इति श्रीमत्स्वामिसदानंदविरचिते शैवसुधाकरे दीपोत्कर्षवर्णनं नाम त्रयोदशः किरणः ॥ १३ ॥ अथ नैवेद्यं ॥ सौरपुराणे ॥ शालितंडुलप्रस्थेन कुर्यादन्नं सुसंस्कृतं ॥ नानाव्यंजनसंयुक्तं शिवलोके महीयते ॥ १ ॥ गुडखंडघृतानां च भक्ष्याणां च निवेदनात् ॥ घृतेन पाचितानां च दत्त्वा शतगुणं भवेत् ॥ २ ॥ शिवधर्मोत्तरे ॥ सदा शिवस्य नैवेद्ये यावत्सिक्थानि संख्यया ॥ तावद्वर्षसहस्राणि दाता शिवपुरे वसेत् ॥ ३ ॥ घृतस्य प्लुतैः सिक्थैः पुण्यं शतगुणोत्तरं ॥ उपदंशयुतैर्ज्ञेयं पुण्यं दशगुणोत्तरं ॥ ४ ॥ सुगंधिशालिनैवेद्ये विज्ञेयमयुताधिकं ॥ स्कांदे ॥ यावंतस्तंदुलास्तस्मिन्नैवेद्ये संति संख्यया ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥ १ ॥ दद्याद्दिने दिने स्वन्नं पुरुषाहारसंमितं ॥ इदमशक्तविषयकं ॥ आढकद्वयसमं महानैवेद्यं कुर्यात् ॥ महानैवेद्यलक्षणमुक्तं विद्येश्वरसंहितायां ॥ शालितंडुलभारेण मारिचषस्य केन च ॥ यवैश्चाढकप्रस्थैर्माज्यकुडवेन च ॥ १ ॥ द्रोणमानेन मुद्गान्नं द्वादशव्यंजनान्वितं ॥ घृतपक्वैरपूपैश्च

मोदकैर्मल्लिकादिभिः॥२॥ द्वादशैर्घृतदधिक्षीरद्वादशप्रस्थकेन च॥ द्वादशैरिति द्वादशभिरित्यर्थः॥ इदं पूर्वोक्तान्नादि नालि
केरफलादीनि सहस्रशतसंख्यया सहस्रं वा शतं वा इति सहस्रशतं इति बहुव्रीहिः॥ इयं संख्या फलसमुदायापेक्षया॥ न तु

प्रत्येकापेक्षया॥ द्वादश क्रमुकैर्युक्तं षड्विंशत्पत्रकैर्युतं॥ कर्पूरखदिरचूर्णेन पंचसौगंधिकैर्युतं॥ तांबूलमेवं कथितं महा
नैवेद्यलक्षणं॥ इति श्रीमत्स्वामिसदानंदविरचिते शैवसुधाकरे नैवेद्योत्कर्षवर्णनं नाम चतुर्दशः किरणः॥१४॥ ॥
अथ तांबूलं॥ काशीखंडे॥ मुखवासं तु यो दद्याद्दत्वा नैवेद्यमुत्तमं॥ संख्यासमुद्ररत्नानां कथंचित्कर्तुमिष्यते॥१
॥ मुखवासादिदानस्य कः संख्यामत्र कारयेत्॥ मुखवासं तांबूलमित्यर्थः॥ इति श्रीमत्स्वामिसदानंदविरचिते शै
वसुधाकरे तांबूलोत्कर्षवर्णनं नाम पंचदशः किरणः॥१५॥ अथ प्रदक्षिणा॥ सनत्कुमारसंहितायां॥ प्रदक्षिणा
नमस्कारौ सर्वाभीष्टप्रदावुभौ॥ पूजांते च सदा कार्यौ भोगमोक्षार्थिभिर्नरैः॥१॥ बृहन्नारदीये॥ शिवं प्रदक्षिणीकृत्य स-
व्यासव्यविधानतः॥ यत्फलं समवाप्नोति तन्मे निगदतः शृणु॥१॥ राजन्प्रदक्षिणैकेन मुच्यते ब्रह्महत्यया॥ द्विती
येनाधिकारित्वं तृतीयेनेंद्रसंपदं॥ प्राप्नोतीति शेषः॥ कूर्मपुराणे॥ प्रदक्षिणं द्विजः कुर्यात्पंच ब्रह्माणि वै जपन्॥ पंच
ब्रह्माणि सद्योजातादि पंचमंत्राः॥१॥ प्रदक्षिणसंख्यामाह॥ शिवरहस्ये॥ शिवप्रदक्षिणं कुर्यात्स्वयमष्टोत्तरं शतं॥

सहस्रमयुतं लक्षं कोटिमन्येन कारयेत्॥१॥ प्रदक्षिणात्रयं कुर्यात्सप्त पंच दशाथवा॥ अष्टौ द्वादश वा का
र्यास्त्वधिकाश्चविशक्तितः॥१॥ इति कालभेदात्संख्याभेदमाह॥ शिवरहस्ये॥ प्रातःशिवार्चने देवि दश कार्याः
प्रदक्षिणाः॥ मध्याह्ने द्वादश ख्याता एकादश सायाह्नि सादरं॥१॥ प्रदक्षिणाप्रकारः॥ स्कांदे॥ वृषभांतरितो भूत्वापीठकां
तरमेव च॥ प्रदक्षिणां न कुर्वीत कुर्वन्विपदमश्नुते॥ पाद्मे॥ अपसव्यं यतीनांतु सव्यंतु ब्रह्मचारिणः॥ सव्यासव्यं गृह
स्थस्य शंभोः श्रीकंठप्रदक्षिणं॥२॥ सव्यासव्यस्वरूपंतु॥ स्थाने वृषस्य संकल्प्य वृषभाद्वै प्रदक्षिणं॥ सव्ये सव्यं विजानी
यादपसव्येपसव्यकं॥ वृषे चंडे च मध्ये च सोमसूत्रे पुनर्वृषे॥ इति बृहन्नारदीये उक्तं॥ चंडस्थानमथेशानी दिक्कं न च प्रदक्षि
णोपेतं यः कुर्यात्तु प्रदक्षिणं॥ त्रिंशत्सहस्रसंख्याकप्रदक्षिणफलं लभेदित्यपि॥ तत्रैवास्या एव नव प्रदक्षिणालमुक्तं
॥ गृहस्थानामपि ज्योतिर्लिंगादिषु सव्यासव्यनियमो नास्ति॥ तदुक्तं सूतसंहितायां॥ ज्योतिर्लिंगे रत्नलिंगे॥ स्वयंभुवि त
थैव च॥ वृषचंडादिनियमः स्फरेश्वरे न विद्यते॥ लिंगपुराणे॥ सर्वदिक्षु महाभागे विप्रैः कुर्यात्प्रदक्षिणं॥ सोमसूत्रा
दिनियमो नास्ति विश्वेश्वरालये॥ सोमसूत्रोल्लंघने दोषो नास्तीति भावः॥१॥ विशेषो विश्वेश्वरस्याप्यादिपुराणे॥ पश्चिमा
भिमुखं लिंगं लिंगं दिग्विवर्जितं॥ गिरिलिंगं स्थललिंगं जललिंगं तथैव च॥ लिंगेष्वेतेषु सर्वेषु कुर्यात्पूर्णप्रदक्षिणं॥

पश्चिमाभिमुखं विश्वेश्वरादि॥ गिरिलिंगं त्र्यंबकादि॥ स्थललिंगं काश्यादि॥ जललिंगं वरुणेश्वरादि॥ एतेषु वि
प्रदोषकाले सव्यापसव्यप्रकारेणैव प्रदक्षिणा कार्या॥ अत एव॥ सनत्कुमारसंहितायां॥ सव्यापसव्यप्रकारेणैव व्या
सेन अष्टम्यां प्रदोषे विश्वेश्वरे॥ प्रदक्षिणा कृता इत्युक्तं॥ लिंगांतरे तु॥ सति सामर्थ्ये गृहस्थेन सर्वदा सव्यापसव्यप्रका
रेणैव प्रदक्षिणा कर्त्तव्या॥ असति तु कालांतरे सव्यापसव्यप्रकारवर्जनेपि न दोषः॥ अवश्यं सव्यापसव्यप्रकारेणैव प्र
दक्षिणा कर्त्तव्या॥ तदुक्तं शिवरहस्ये॥ शाक्तैस्तु सर्वदा कार्यं सव्यासव्यप्रदक्षिणं॥ इदं कार्यं प्रदोषेषु शाक्तिहीनैरविधि
ज्ञैः॥ १॥ अशक्तानां कालांतरे सोमसूत्रलंघनेन दोष इति भावः॥ प्रदक्षिणानियमो भविष्ये॥ आसन्नप्रसवा नारी ज
लपूर्णं घटं यथा॥ उद्वहंती शनैर्याति तथा कुर्यात्प्रदक्षिणं॥ पदे पदांतरं गत्वा करौ चलनवर्जितौ॥ वाचा स्तोत्रं हृदि ध्या
नं चतुरंगं प्रदक्षिणं॥ २॥ नारदीये॥ शिवप्रदक्षिणायां तु मौनं कार्यं प्रयत्नतः॥ कृतांजलिपुटैरेव शिवस्मरणपूर्वकं
॥ ३॥ बृहन्नारदीये॥ शिवं प्रदक्षिणीकुर्वन्सोमसूत्रं न लंघयेत्॥ लंघिते त्वेकमेव स्यादनुच्छेदेऽयुतत्रयम्॥ सोमसूत्र
मानमुक्तं॥ सिद्धांतशेखरे॥ प्रासादविस्तारसमानसूत्रं सोमस्य सूत्रं हि सोमसूत्रं॥ सूत्राद्बहिर्लंघनतो न दोषः सदो २४
षमभ्यंतरलंघने तु॥ १॥ अस्यार्थो लिंगार्चनचंद्रिकादिसंमतः॥ प्रासादशब्देन प्रासादांतर्गतो लिंगाभिस्यंतरालदे

शो गृह्यते॥ तद्विस्तारेण समानसूत्रं यत्तु भित्तेर्बहिः॥ सोमस्य दिग्नि उत्तरदिग्नि सूत्रं तत्सोमसूत्रं॥ तावन्मात्रमुल्लंघने दो
षड्यांजकमित्यर्थः॥ सूत्राद्बहिस्तत्परिमाणा सोमसूत्राद्बहिर्न दोषः॥ ततोऽप्रणालिकालंघने पि न दोषः॥ किंतु॥
एकमेवैकं स्यादिति भावः सर्वथा तल्लंघने तु अयुतत्रयं प्रदक्षिणाफलं स्यात्॥ यथाक्रमव्याख्याने तु एकमेव स्यादि
ति बृहन्नारदीयोक्तं न संगच्छेत॥ तल्लंघनस्य निषिद्धत्वात् काष्ठलोष्ठादिभिराच्छिन्नायाः॥ उक्तपरिमाण सोमसूत्रांतर्गता
याः प्रणालिकायाः भित्तेर्बहिर्लंघने तु न दोषः॥ तदुक्तं सूतसंहितायां काष्ठलोष्ठादिभिश्छन्ने लंघने नैव दुष्यति॥ सो
मसूत्रमनुल्लंघ्य गर्भे कार्या प्रदक्षिणा॥१॥ हवीयदि भवेत्कुर्वन्नैनो वेसत्र न सर्वथा॥ सोमसूत्रमनुल्लंघ्य गर्भे सद्वृषभे पिच
॥२॥ पिहितं वाप्यपिहितं सोमसूत्रं न लंघयेत्॥ वहिश्चापिहितं सूत्रमुल्लंघ्याप्नोति यातनां॥ ३॥ अपिहितमिति नश्च
मासः॥ बृहन्नारदीये॥ प्रदक्षिणात्रयं कृत्वा नमस्कारैश्च पंचभिः॥ पुनः प्रदक्षिणं कृत्वा शिवलोके महीयते॥१॥ एक
हस्तनमस्कारादेकस्माच्च प्रदक्षिणात्॥ अंधकारे नमस्कारात् दद्धपुण्यं विनश्यति॥ ॥इति श्रीमत्स्वामिसदानंदविर
चिते शैवस्कंधाकरे प्रदक्षिणोक्तं वर्णनं नाम षोडशः किरणः॥१६॥ अथ नमस्कारः॥ ब्रह्मवैवर्ते॥ पूजयित्वा महादेवं लिं
गरूपिणमव्ययं॥ प्रदक्षिणात्रयं कृत्वा प्रणमेद्दशपंच वा॥१॥ लैंगे॥ साष्टांगो दंडवन्नम्रो भक्तिपूर्वकं॥ कर्तव्यः श्रीमहे

शायदेवदेवाय सर्वदा ॥ २ ॥ शिवधर्मोत्तरे ॥ ये कुर्वंति नमस्कारमीश्वराय क्वचित्क्वचित् ॥ संपर्कात्कौतुकाल्लोभात्ते वि
मानैः प्रयांति वै ॥ १ ॥ काशीखंडे ॥ लिंगं समर्चितं दृष्ट्वा यः कुर्यात्प्रणतिं सकृत् ॥ संदेहो जायते तस्य पुनर्देहनिबंधने ॥ त
थाव्यासः ॥ एवंविधे कलियुगे दोषाणामेकशोधनं ॥ महादेवनमस्कारो ध्यानं दानमिति श्रुतिः ॥ १ ॥ शिवरहस्ये ॥ अष्टांग
सहिताः कार्याः ॥ प्रणामाः पार्वतीपतेः ॥ अष्टांगान्युक्तानि ॥ कूर्मपुराणे ॥ जानुबाहुशिरश्चक्षुर्गंडांतांगाष्टकं यदि ॥ दंडवत्प्र
णामस्तं सदष्टांगनतिर्भवेत् ॥ चक्रदृष्टिः साष्टांगनमस्काराकरणे प्रत्यवायोप्युक्तस्तत्रैव ॥ यः साष्टांगं महादेवं न नमेत्सावधान
तः ॥ सदष्टांगइतिज्ञेयः सत्यं सत्यं न संशयः ॥ १ ॥ लैंगे ॥ शिवस्यार्द्धनमस्कारः शिवद्वेषइतिस्मृतः ॥ सपुण्यनाशकस्तस्मात्त
त्कर्ता पापकृद्भवेत् ॥ १ ॥ पतितो दंडवद्भूमावुत्थायोत्थाय भूरिशः ॥ प्रणामास्तु प्रकर्तव्याः शंकराय महात्मने ॥ २ ॥ स्कां
दे ॥ उत्थायोत्थाय साष्टांगं प्रणामान्विंशादुसपान् ॥ यः करिष्यति यत्नेन स पापेभ्यो विमुच्यते ॥ १ ॥ कौर्मे ॥ सदा शिवं
नमस्कुर्यान्मंत्रेणाष्टोत्तरं शतं ॥ शिवरहस्ये ॥ एकविंशतिः कर्तव्याः प्रणामाः पार्वतीपतेः ॥ एकादशाथवा पंचाथवा नातो
न्यूनाः कदाचन ॥ १ ॥ यत्तु ॥ नमस्कारत्रयं कुर्यान्महादेवे सदा नरः ॥ १ ॥ तदष्टत्वात्स्कविषयं ॥ यत्तु सिद्धांतशेखरे ॥ दंडप्र
णमन्मात्रः स्यात्प्रणामो यन्नमस्कृतिः ॥ अष्टांगी रुप्यंचांगो त्रिभिरंगैस्त्रिधा मतः ॥ २ ॥ शिर साहस्तयुग्मेन कर्णौ च्यां

स्तुतुकेन च ॥ बाहुभ्यां तु त्र्यमङ्गैः संस्पर्शयन् प्रणमेच्छिवं ॥ २ ॥ शिरोहस्तौ च जानुभ्यां पञ्चाङ्गैः प्रणमेच्छिवं ॥ शि
रसा हस्तयुग्मेन त्रिभिरङ्गैर्नमेच्छिवं ॥ ३ ॥ यथोचितं नमेद्देवं देशकालाद्यपेक्षयाऽपि ॥ तदपि साष्टाङ्गकरणसमर्थविष
यं ॥ देशकालाद्यपेक्षयेति तत्रैवोक्तत्वात् ॥ ब्रह्मवैवर्ते ॥ अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ॥ जपहोमनमस्कारान्न कु
र्याद्देवमालये ॥ १ ॥ अग्रे मृत्युमवाप्नोति पृष्ठे त्वपचयः स्मृतः ॥ वामभागे भवेन्नाशो दक्षिणे सर्वकामदः ॥ २ ॥ अत्र दक्षिण
भागो देवस्य ॥ न त्वात्मनः ॥ तदुक्तं ज्ञानरत्नमालायां ॥ देवस्य दक्षिणे भागे नमस्कारं प्रकल्पयेत् ॥ इति विशेष्य स्वस्य पश्चिमा
भिमुखत्वेन मुक्तिमण्डपस्य वामभागत्वेऽपि विशेषवचनात् ॥ तत्रैव प्रणामादिकं कार्यं ॥ तदुक्तं काशीखण्डे ॥ देवस्य दक्षिणे भागे
स्थित्वा निर्वाणमण्डपे ॥ नमस्कारत्रयं कृत्वा सर्वपापैः प्रमुच्यते ॥ १ ॥ इति दक्षिणे भागे दक्षिणस्यां दिशि इत्यर्थः ॥ इति नदि
रोधः ॥ अत्रायं संक्षेपः स्वाममनिर्वाणमण्डपे ॥ इति च ॥ केचित्तु ॥ पशोः पशुपतेरग्रे दण्डवत्पतितस्य हि ॥ पतन्ति पातकाः
सर्वे नोत्तिष्ठन्ति कदाचन ॥ इति विशेषविधानात् शंभोरग्र एव नमस्कारः कार्यः इत्याहुः ॥ ॥ इति श्रीमत्स्वामिसदानन्दवि
रचिते शैवसुधाकरे नमस्कारोत्कर्षवर्णनं नाम सप्तदशः किरणः ॥ १७ ॥ सूतसंहितायां शिवपूजायां दिङ्नियमादिक
मुक्तं ॥ स्नात्वा शुद्धासने देशे गोमयेनोपलेपिते ॥ समासीनः सदा मौनी निश्चलोदङ्मुखः शुचिः ॥ १ ॥ बृहस्पतिः ॥ काञ्च

क्रौ.सु.

२६

नि दैनदिने भेदमाह ॥ शिवार्चनंसदाकार्यंभुक्तिमुक्तिप्रदंनृभिः ॥ प्राक्पश्चिमोदगास्यैस्तु प्रातःसायंनिशासुच इति ॥ ॥
॥ इति श्रीमत्स्वामिसदानन्दविरचिते शैवरत्नाकरे दिङ्नियमनिरूपणं नाम अष्टादशः किरणः ॥ १८ ॥ अथ नैवेद्यभ
क्षणनिर्णयः ॥ जाबालोपनिषदि ॥ रुद्रभुक्तंभुंजीत ॥ रुद्रपीतंपिबेत ॥ रुद्राघ्रातंजिघ्रेद्रुद्रेणाशितमश्नातिरुद्रेणपीतंपिबंति
॥ रुद्राघ्रातंजिघ्रंति ॥ तस्माद्ब्राह्मणाः प्रशांतमनसोनिर्माल्यमेवभक्षयंति ॥ तत्रशिवनिर्माल्यतदितरभोजनस्यरागतः ॥ प्रा
प्तत्वान्नभुंजीतइत्यादिपरिसंख्याविधिः ॥ पंचनखभक्षणादिविधिवत् ॥ एतदेवशिवनिर्माल्यमेवभक्षयंतीत्येवकारेण
दृढीकृतं ॥ ब्राह्मणाइति ॥ क्षत्रियादेरप्युपलक्षणं ॥ ब्राह्मणपदस्य ॥ अर्थवादस्थत्वेनोपसंहारस्थत्वेनचउपक्रमस्थ
विधिसंकोचकत्वासंभवात् ॥ एतद्धिविनियमितभोजनस्यैवसायंप्रातर्द्विजातीनामशनंश्रुतिचोदितंनित्यादौ
प्राङ्मुखोन्नानिभुंजीतेत्यादौचदेशकालादिनियमः क्रियते ॥ एवंचसतियद्यपिश्रुतिविरोधात् ॥ शिवनिर्माल्य
भक्षणनिषेधवाक्यानिसर्वाणिचसमस्मृतिवच्चप्रमाणानीतिवक्तुमुचितं ॥ अतएवविरोधेत्वनपेक्षंस्यादसतिह्यनुमा
नमितिजैमिनिसूत्रं ॥ श्रुतिस्मृतिविरोधेतुश्रुतिरेवबलीयसी ॥ स्मृत्याचारविरोधेतुस्मृतिरेवगरीयसी ॥ तिन्यायः
॥ श्रुतिस्मृतिसदाचारइतिमन्वादिसंग्रहीतावरोहक्रमश्चसंगच्छते ॥ तथापि ॥ अस्याद्यहिजनबोधनायनिर्माल्य २

न ग्रहणं निषेध्यवाक्यानां बहुपुराणवचनात्प्रष्टं तेन व्यवस्थोल्लिख्यते॥ तत्र माधवद्विजयः॥ जैगी॥ पुष्पं फलं स्कन्धं पत्र
वस्त्राण्याभरणानि च॥ शिवार्पितानि स्वीकुर्यादन्यथा किल्बिषी भवेत्॥१॥ शिवाग्रे शिवनिर्माल्यमृष्टं लौतव शिवद्वि
जात्॥ स्वयमेवाददानस्तु नरकं प्रतिपद्यते॥२॥ ब्रह्मांडे॥ मत्प्रमन्नं प्रयत्नेन निवेद्याश्नाति यः सदा॥ स भूपालः सर्व
वेत्ता भवत्येव हि सर्वथा॥३॥ अतीतानागतं ज्ञानं भूपालत्वं च शाश्वतं॥ जातिस्मरत्वं सोऽहं ध्यै मन्नैवेद्यसमर्पणात्॥४॥ म
न्नैवेद्यमनुच्छिष्टं लब्धानुष्ठितमुत्तमं॥ योऽश्नाति स तु सर्वज्ञः स भूपालोऽपि जायते॥५॥ निर्माल्यसलिलं पीत्वा वेदयनन्न्
लिनः॥ क्षयापस्मारकुष्ठाद्यैः सद्यो मुच्येत बंधनात्॥६॥ निर्माल्यं परमं पुण्यं नैवेद्यं पापनाशनं॥ ब्रह्मचारिगृहस्थानां य
तीनां च विमुक्तिदं॥७॥ निर्मलत्वाच्च निर्माल्यं नृणां मे मलकारणं॥ यद्यदात्महितं लोके तत्सद्भ्यं परं पदम्॥८॥ शिव
लिंगार्पितं कुर्यात्सम्यक् तुष्यति शंकरः॥ उपवाससहस्राणि ग्रासाः पञ्चायुतानि च॥९॥ शिवार्पितं विना भुंक्ते स याति भवति
किल्बिषी॥ सर्वार्द्धं कुर्वन्ति लिंगेऽपि यः॥ सूतसंहितायां॥ शांभो निर्माल्यकं शुद्धं भुंजीयात्सर्वतो द्विजः॥ अन्यदेवस्य नै
वेद्यं भुक्त्वा चांद्रायणं चरेत्॥ स्कांदे॥ प्रसादमन्यदेवस्य भुंजतां किल्बिषं भवेत्॥ शिवस्यैव तु निर्माल्यं न कदा धार्य्य
द्विजातिभिः॥ इत्यादि शिवपुराणे॥ निर्माल्यलंघने दोषो धारणे च विशेषतः॥ भस्मारके कुविच्छंभो निर्माल्यं न कदा

येत्॥ इत्यादिनिषेधवाक्यानि तन्नमध्यस्थानात॥ नारदः॥ शिवानुभूतमखिलं परिभाषते॥ भोज्यं धार्यमिति द्वेधा बहुधं वत-
दिश्यते॥१॥ देवस्वं देवताद्रव्यं नैवेद्यं च निवेदितं॥ चंडद्रव्यं बहिः क्षिप्तं निर्माल्यं चाहुर्धमतं॥४॥ इति निर्माल्यस्य बहुधत्वमु-
क्तं॥ दासीदासादीनां देवस्वत्वं हेमरूप्यकरत्नादीनां देवताद्रव्यत्वं संकल्पपूर्वकं समर्पितानामन्नजलादीनां नैवेद्यत्वं चो-
क्तं एतत्त्रिविधं निर्माल्यमनर्हमिति कथ्यते॥ शताद्वाङ्गो जनं कुर्वन् भूमौ सस्यादमंगलः॥१॥ इति एतत्त्रिविधस्यात्यस्य भो-
जनं निषिद्धं॥ शिवोपभुक्तसगंधमन्नपानादिकं तथा॥ निवेदितं निर्माल्यं सर्वपापहरं परं॥ इति निवेदितस्य गंधादि-
भोजनं संस्तुत्य॥ चंडद्रव्यबहिःक्षिप्तयोरभक्ष्यत्वमुक्तं॥ इदमाह॥ निर्माल्यं बहुधं भोज्यमेकमेव निवेदितं॥ अतो यानि
विधायकवचनानि तानि निवेदितविषयाणि॥ यानि तु निषेधवाक्यानि॥ तानि देवस्वादिपंचविधनिर्माल्यविषयाणीति
नारदसंमता व्यवस्थावेदितव्या॥ इदं च निवेदितं शिवेतरदेवभक्तैरपि भोज्यं॥ तदुक्तं भुंजीत इति श्रीदाहृत भक्तसिवला-
त्॥ ततो निर्दिष्टं गुणैर्नभोज्यं॥ शिवभक्तैरुक्तनिवेदिताच्छितरदपि भोक्तव्यं॥ इति शिवपुराणादिसंमता व्यवस्था॥ तथा
हि शिवपुराणे॥ निर्माल्यं निर्मलं शुद्धं निर्मलत्वादनिंदितं॥ तस्माद्भोज्यं निर्माल्यं प्राकृतैरपि वाप्यकैः॥१॥ श्रीमान्नध-
रैये अंभोनिर्माल्यं चनमस्थयेत्॥ जिह्वाधापल्यसंयुक्तएपसंस्कारवर्जितः॥२॥ शिवनिर्माल्यभोजी च रौरवं नरकं २

इअदितिशिवसंहितायां ॥ व्यासजैमिनिसंवादे जैमिनिः ॥ अनर्हं मम नैवेद्यं पादांबु कुसुमं दलं ॥ इतीश्वरेण कथि
तं तत्र केचिन्महर्षयः ॥ १ ॥ वदंति तत्कथं स्वामिन् यथार्थं कथयस्व मे ॥ व्यासः ॥ देवदेवस्य वचसो विषयोऽयं न जैमिने
॥ वीरभद्रेण शापिताः शिवभक्तिपराङ्मुखाः ॥ २ ॥ शंभोरन्यत्र देवेषु ये भक्तास्तेन दीक्षिताः । तेषामनर्हमीशस्य तत्प्रसादच
तुष्टयं ॥ ३ ॥ यद्यपि शिवपुराणे ॥ शिवभक्तिवर्जितानां निर्माल्यभोजननिषेधः सामान्येन प्रतीयते ॥ शैवसंहितायां
च ॥ पाद्यं वाद्येरनर्हत्वं सामान्येन प्रतीयते ॥ तथापि तत् निवेदितेतरविषयकम् ॥ पूर्वोदाहृतश्रुतिनारदादिवचन
प्रामाण्यात् ॥ नारदेन संकल्प्यार्पितस्यैवान्नादेर्नैवेद्यस्योक्तत्वेन तस्याहवर्यात् ॥ पादांबुप्रभृतेरपि संकल्प्यार्पि
तस्यैव निषेधसंभवेन पूजामात्रसंकल्पेनार्पितस्य ॥ ध्यानमात्रेणार्पितस्य च निषेधासंभवाच्च लोभादेवाशैवस्य धा
रणनिषेधेन प्राणयात्रार्थं धारणभक्षणयोरशैवस्यापि धारणादिनिषेधाभावाच्च ॥ कामिके ईश्वरवचनमपि ॥ ।
अप्रबुद्धात्माऽछचिर्लोभान्मद्भुक्तं पावनं परं ॥ भक्षयेन्नाशमायाति भ्रष्टो लक्ष्यध्यनादिवा ॥ १ ॥ एवं च ॥ यानि सामा
न्यशिवनिर्माल्यभोजननिषेधवाक्यानि तानि शिवभक्तिवर्जितानां निवेदितेतरनिर्माल्यभक्षणनिषेधपराणि ॥ य
दि तु निवेदितभक्षणनिषेधवचनमपि क्वचिदुपलभ्यते ॥ तत्तु श्रुत्यादिविरोधादुक्तन्यायेनोपेक्षणीयमेव ॥ यत्र तु

शिवसंनिधानंनास्ति॥ तत्रापिबुद्धितनविधासितेनचस्नानादिकंवागादिनाशिवायसमर्प्यैवभोक्तव्यमुक्त
क्तस्याद्युपसारात्॥ आयतनविशेषेतुशिवभक्तिवर्जितानामपिलोभात्॥ एवंविधनिर्माल्यधारणेपिनदोषः॥
तदुक्तमग्निपुराणे॥ बाणलिंगेचलेलोहेसिद्धलिंगेस्वयंभुवि॥ प्रतिमासुचसर्वासुनदोषोमाल्यधारणे॥ निर्माल्य
धारणेप्ययमर्थः॥ नैवेद्यंनिवेदितपरमनिवेदितपरत्वेपि॥ शैवपरमशैवपरत्वेविप्राणयात्रामात्रसाधकधारणपरम
तिवाच्यं॥ तत्रपूर्वोक्तरीत्यादोषाप्रसक्तेरेवप्रतिप्रसवायोगात्॥ लोहेधातुमयेस्कांदे॥ अथान्यच्छिवनिर्माल्यप
त्रपुष्पंदलंजलं॥ शालिग्रामस्यसंसर्गात्सर्वंयातिपवित्रतां॥१॥ शालिग्रामसंसर्गेणाम्॥ शालिग्रामस्यसर्वदेवात्म
कत्वेनसर्वदेवपूजाधारत्वात्तत्रशिवपूजायांपत्रादीनामर्पणं॥ इतिलक्षणप्रकाशेस्थितं॥ तत्पर्यालोच
नात्तु॥ शिवनाभिविषयकमेतदिति॥ स्थितं॥ पूजाप्रकाशेप्युदाहृतं॥ पाद्मे॥ शालग्रामशिलालिंगेयःकरोतिम
मार्चनं॥ तेनार्चितःकार्त्तिकेययुगानामेकसप्ततिं॥ ननुशालिग्रामेणसहपूजितशिवायार्पणमितित्रिमितव्यं अ
दरस्वारस्यात्॥ तथाभवन्तीति॥ तस्मात्शिवनिर्माल्यंसर्वोत्कृष्टं॥ नकस्यापिवर्जनीयमितिसिद्धं॥ अतएव॥ नि
यतकमलसंख्यापरिपूरणायसमर्पितंनेत्रंनिर्माल्यभूतंविष्णुर्दधार॥ इतिपुराणेप्रसिद्धं॥ ब्रह्मादयोपिशिव २८

निर्माल्यंधारयंति॥तथाच॥भागवतेचतुर्थस्कंधेदक्षंप्रतिसतीवाक्यं॥किंवाशिवाख्यमशिवंनविदुस्त्वदन्ये॥ब्रह्मादय
स्तमवकीर्य्यजटाःश्मशाने॥तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्येमूर्द्धभिर्दधतितच्चरणावसृष्टं॥१॥तच्चरणादवसृष्टं
गलितंनिर्माल्यंयेमूर्द्धभिर्धारयंतीतिश्रीधरः॥यद्यपिशिवनिर्माल्यमेवभोक्तव्यंनान्यदेवनिवेदितंनचाऽनिवेदितं॥इति
पूर्वोदाहृतस्मृत्यादिबलात्सिद्धेऽर्थेप्रतिपदंसामान्यतश्चश्रीमद्भागवतादिवचांसिनिषेधरूपाणिबहुशउपलभ्यंते॥त
थापिविस्तरभयात्॥अस्मासुपरेषांविद्वेषत्वसंभावनयासूतानिनोपन्यस्यंते॥इत्यलं॥यदश्नीदुर्लोकेपचतिविवि
धंत्वौषधिगणंतथैवान्नंवल्लीरविरपिपुमानीहसकलं॥विधिर्यद्वैतोजोजनयतिजगत्स्थावरचरं॥सुवर्णंयद्वैतःसुरन
रगणाबिभ्रतितनौ॥१॥कृतीयंहृत्क्वाजामनसिदधतेवाधिचबुधाःयदंघ्र्युत्थंचक्रंहरिरवतिबिभ्रत्त्रिभुवनं॥तथाप्येते
नेत्रंहरयजनसंभूतमनिशं॥कईछेमोक्तुंतत्परमशिवसंपर्करहितं॥२॥ इतिश्रीमत्स्वामिसदानंदविरचितेशैव
सुधाकरेनैवेद्योत्कर्षनिरूपणंनामैकोनविंशःकिरणः॥१९॥अथसद्योजातादिपंचब्रह्ममंत्रैर्बोधायनोक्तप्रकारे
णपार्थिवपूजाप्रयोगः॥तत्रादौकृतावश्यककृत्यःस्नानादिनाशुचिर्भूत्वाधृतत्रिपुंड्ररुद्राक्षमालः॥कृतसंध्यावंदना
दिनित्यक्रियःप्रयतोब्रह्मचारीशुक्लवासाउदीचीदिशंगत्वाशुचौदेशेपाषाणवेणुकीटकेशास्थिवालुकादि

दोषरहितां मृदं दृष्ट्वा॥ तत्र गंधाक्षतपचारैर्भूमिं संपूज्य नखा॥ ईशानकोणगतां मृदं शस्त्रेणोत्कीर्य॥ अष्टांगुलां मृदम
पाहृत्य॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च॥ २॥ इति मंत्रेण गृहीतां मृद
मादाय॥ शूद्रादिस्पर्शरहितो मौनी गृहे आगत्य शुचिस्थले तां स्थापयेत्॥ कृताचमनश्चैलाजिनकुशोत्तरे स्वासने उद
ङ्मुख उपविशेत्॥ ततः पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवि पवित्रं कुरु चासनं॥ १ इति भूमि
प्रार्थ्य॥ अपसर्पंतु ते भूता ये भूता भूमिसंस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ इति पठित्वा॥ गौरसर्षपा
न् चतुर्दिक्षु विकिरेत्॥ ततो विष्णुर्विष्णुरित्याद्येवंगुणविशेषणविशिष्टायां पुण्यतिथावित्यंते देशकालादि संकीर्त्य
मम सकलमनोरथसिद्धिदुरितक्षयद्वारा श्रीभवानीशंकरप्रीत्यर्थं अमुकसंख्याकपार्थिवलिंगानां पूजनं तंत्रेण पृथ
क् पृथग्वा करिष्ये इति संकल्पं कुर्यात्॥ यजमानस्य चेदमुकशर्मणो यजमानस्याभीष्टसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं
अमुकसंख्यया पार्थिवलिंगानां पूजनं करिष्यामीति संकल्पं कुर्यादिति॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः॥
भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः॥ इति मंत्रेण मृदश्चूर्णं कुर्यात्॥ वामदेवाय नमो ज्येष्ठाय नमः॥ श्रेष्ठाय नमो रु २९
द्राय नमः॥ कालाय नमः॥ कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः॥ सर्वभूतदमना

य नमो॥ भवोद्भवाय नमः॥ इति जलसेचनं॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः॥ सर्वेभ्यः॥ सर्वसर्वेभ्यो नम
स्ते अस्तु रुद्ररूपेभ्यः॥ इति संयोजनं॥ तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥ इति पिंडीक
रणं॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥ इति मंत्रेण
यथोक्तमेव लब्धं खंडलिंगं लिंगानि वा विधाय सद्यः समस्ताघनाशनेति शिरसा निधाय॥ इति वामपाणौ वेदिकायां ताम्र
पात्रे वा बिल्वपत्रं निधाय॥ तदुपरि सादरं तत्पुष्पं लिंगं संस्थाप्य प्राणप्रतिष्ठां कुर्यात्॥ प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरु
द्रा ऋषयः ऋग्यजुःसामानि छंदांसि॥ प्राणाख्या देवता॥ आं बीजं॥ ह्रीं शक्तिः॥ क्रौं कीलकं॥ पार्थिवलिंगप्रतिष्ठा
पने विनियोगः॥ ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं हंसः॥ शिवस्य प्राणाः शिवस्य जीवः॥ शिवस्य सर्वेंद्रियाणि इहागत्य सु
खं चिरं तिष्ठंतु स्वाहा॥ शिवेहागच्छेह तिष्ठ मम पूजां गृहाणेति प्राणप्रतिष्ठां कृत्वा॥ लिंगानां बहुत्वे प्राणप्रतिष्ठां पृथ
क् पृथक् कुर्यात्॥ पूजने विकल्पः॥ तंत्रेण पृथक् पृथग्वा॥ सहपुष्पोदकेन लिंगे देवमावाहयेत्॥ ॐ भूः पुरुष
मावाहयामि॥ ॐ भुवः पुरुषमावाहयामि॥ ॐ स्वः पुरुषमावाहयामि॥ ॐ भूर्भुवः स्वः पुरुष
मावाहयामि॥ ओमायातु भगवान्महादेव इत्यावाहयेत्॥ स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकं॥ तावत्त्वं प्रीति

े·सु

९

भावेन लिंगेस्मिन्संनिधिं कुरु ॥ २ ॥ इति संप्रार्थ्य ॥ स्वस्य वामभागे जलपूर्णं कलशं स्थापयेत् ॥ सामग्रीं दक्षिण
भागे ॥ आपो वा इदꣳ सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोन्नमापोऽमृतमापः सम्राडापो विराडाप
स्स्वराडापः छंदाꣳस्यापो ॥ ज्योतीꣳष्यापो यजूꣳष्यापः सत्यमापः सर्वा देवता ॥ आपो भूर्भुवः स्वराप ओम् ॥ इत्यभि
मंत्र्य ॥ गंधाक्षतैः संपूज्य ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृता
ः ॥ १ ॥ कुक्षौ तु सागराः ॥ सप्तसप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः ॥ सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः
सर्वे कलशं तु समाश्रिताः ॥ अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा ॥ आयांतु शिवपूजार्थं दुरितक्षयकार
काः ॥ इति कलशे सर्वतीर्थान्यावाह्य ॥ तत्रस्थैर्जलैस्तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदया-
त् ॥ इति रुद्रगायत्र्या स्वशरीरं पूजासंभारांश्च संप्रोक्ष्य ॥ ततो ध्यानं ॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्राव
तंसं ॥ रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं ॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं ॥
विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं ॥ १ ॥ दक्षोत्संगनिषण्णकुंजरमुखं प्रेम्णा करेण स्पृशन् ॥ वामो ३०
रुस्थितवल्लभांकललितस्कंदं करेण लालयन् ॥ इष्टाभीतिमनोहरं करयुगं बिभ्रत्प्रसन्नाननो ॥ भूयान्नः शरदिंदु

स्कंदरतनुंश्रेयस्करः शंकरः ॥२॥ आत्मानं सद्रूपं ध्यात्वा ॥ मनःकल्पितैर्गंधादिभिरभ्यर्च्य वामनासापुटाद्धनाम
मनः ॥ सिस्थितशिवं पुष्पक्षेपेण लिंगे आगतं विभाव्य पूजयेत् ॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ आ
सनं समर्पयामि ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनानि विवेश ॥ तस्मै रुद्राय
नमो अस्तु इति यजुषा पाद्यपात्रमभिमंत्र्य प्रक्षाल्य ॥ तिरः पवित्रमपआनीय ॥ पुनस्तेनैवापोभिमंत्र्य सहपवित्रेण
दिग्बंधं दर्शयित्वा ॥ भवे भवे नाति भवे भवस्व मां पाद्यं समर्पयामि ॥ पुनर्यो रुद्रो अग्नौ इति यजुषा अर्घपात्रमभिमंत्र्य प्रक्षा
ल्य तिरः पवित्रमपआनीय पुनस्तेनैवापोऽभिमंत्र्य सहपवित्रेण दिग्बंधं दर्शयित्वा ॥ भवोद्भवाय नमः ॥ अर्घं समर्पयामि
पुनस्तथैवाचमनपात्रमादिग्बंधं दर्शयित्वा वामदेवाय नमः ॥ आचमनं समर्पयामि ॥ ज्येष्ठाय नमः मधुपर्कं समर्पये ॥ आप्यायस्व
समेतु ते इति ॥ पयः ॥ दधिक्राव्णो इति वा पयः स्नानं समर्पयामि ॥ दधिक्राव्णो अकारिषमिति दधिस्नानं समर्पया
मि ॥ घृतं मिमिक्षिरे ॥ इति घृतं ॥ घृतवान इति वा घृतस्नानं समर्पयामि ॥ मधुवातेति मधुस्नानं समर्पयामि ॥ स्वा
दुः पवस्वेति ॥ अपां रसमिति वा शर्करास्नानं समर्पयामि ॥ शुद्धोदकस्नानानि ॥ आपो हि ष्ठेत्याद्या अत्र मंत्राः पठ
नीयाः ॥ तथा सांगेन न्यासरुद्रीयेणाभिषेकं कुर्यात् ॥ अथ व्याहृतिभिः ॥ प्रदक्षिणमुदकं परिषिच्य ॥ पवित्रं पादमू

ले निधायाग्निस्तर्पयति॥ भवं देवं तर्पयामि॥ शर्वं देवं तर्पयामि॥ ईशानं देवं तर्पयामि॥ पशुपतिं देवं तर्पयामि॥ रुद्रं दे
वं तर्पयामि॥ उग्रं देवं तर्पयामि॥ भीमं देवं तर्पयामि॥ महान्तं देवं तर्पयामि इत्यष्टभिर्मंत्रैस्तर्पणं कुर्यात्॥ ज्येष्ठाय नमः

॥ वस्त्रं समर्पयामि॥ रुद्राय नमः॥ उपवीतं समर्पयामि॥ कालाय नमः॥ गंधं समर्पयामि॥ कलविकरणाय नमः॥
अक्षतान् समर्पयामि॥ बलविकरणाय नमः॥ बिल्वपत्रादिधत्तूरादिपुष्पाणि समर्पयामि॥ बलाय नमः॥ धूपं सम
र्पयामि॥ बलप्रमथनाय नमः॥ दीपं समर्पयामि॥ ततो नैवेद्यं॥ अमृतोपस्तरणमसीति प्रतिपदं कृत्वा॥ हविरेविस्
हं सर्वं स्वादुवस्तु कंदमूलफलानि प्रक्षिपेत्॥ मुहूर्त्तं मनं पेक्षमाण आसीनो हविरुद्वासयामि॥ इति नैवेद्यमुद्वास्या
ऽमृतापिधानमसीति प्रतिपदं कृत्वा॥ सर्वभूतदमनाय नमः॥ नैवेद्यं समर्पयामि॥ मनोन्मनाय नमः॥ आचमनं सम
र्पयामि॥ शंभवे नमः॥ तांबूलं समर्पयामि॥ शंभवे नमः॥ प्रदक्षिणं समर्पयामि॥ शंभवे नमः॥ नीराजनं समर्पया
मि॥ शंभवे नमः॥ नमस्कारान् समर्पयामि॥ लिंगस्य प्रागादिदिक्षु वक्ष्यमाणैर्मंत्रैरक्षतान् क्षिपेत्॥ ॐ भवाय क्षि
तिमूर्त्तये नमः॥ शर्वाय जलमूर्त्तये नमः॥ ईशानाय अग्निमूर्त्तये नमः॥ पशुपतये वायुमूर्त्तये नमः॥ रुद्राय आ
काशमूर्त्तये नमः॥ उग्राय यजमानमूर्त्तये नमः॥ भीमाय सोममूर्त्तये नमः॥ ततः प्रार्थना॥ नमः ॐकाररूपाय वे

द्रूपायतेनमः ॥ अलिंगलिंगरूपायविश्वरूपायतेनमः ॥ १ ॥ नमोमोक्षदंदेतुभ्यंनमोनादात्मनेतथा ॥
नमः शब्दस्वरूपायरूपातीतायतेनमः ॥ २ ॥ त्वंमातासर्वलोकानांत्वमेवजगतः पिता ॥ त्वंभ्रातात्वंसुहृन्मि
त्रंत्वंप्रियः प्रियरूपधृक् ॥ ३ ॥ त्वंगुरुस्त्वंगतिः साक्षीत्वंपितात्वंपितामहः ॥ नमस्तेभगवन्रुद्रभास्करामि
ततेजसे ॥ ४ ॥ संसारसागरेमग्नंमामुद्धरशिवाव्यय ॥ अनेनपूजनेनत्वंवांछितार्थप्रदोभव ॥ ५ ॥ दंडवत्
प्रणतोभूत्वास्तुत्वाचैवविशेषतः ॥ एकाग्रः प्रयतोभूत्वामंत्रमेतदुदीरयेत् ॥ ६ ॥ अंगहीनंक्रियाहीनंविधि
हीनंमहेश्वर ॥ पूजितोसिमयादेवतत्क्षमस्वांबिकापते ॥ ७ ॥ अन्यथासक्तचित्तेनक्रियाहीनेनवाविभो ॥
मनोवाक्कायदुष्टेनपूजितोसित्रिलोचन ॥ तत्सर्वंक्षम्यतांदेवप्रासेकृत्वादयांमयि ॥ ८ ॥ इतिप्रार्थनांकृत्वा
॥ रौद्रीभिः ऋग्यजुःसामाथर्वभिश्चार्षैः स्तोत्रैः स्तुत्वा यथाशक्तिपंचाक्षरमंत्रस्यजपंकुर्यात् ॥ शिवपंचाक्षर
मंत्रस्यवामदेवऋषिः पङ्क्तिश्छंदः ॥ शिवोदेवता ॥ सदाशिवप्रीत्यर्थेजपेविनियोगः ॥ अनेनजपेनशिवः
प्रीयतां ॥ प्रयातुभगवान्महादेवइतिविसर्जनंकुर्यात् ॥ बाणलिंगादावावाहनविसर्जनेनस्तः ॥ आवाहन
विसर्जनयोः ॥ पूर्वोक्तस्वरूपत्वेन ॥ तत्रापितेस्तएवेत्युक्तंप्राक् ॥ आवाहनंनजानामिनजानामिविसर्जनं ॥

पूजांचैवनजानामित्वंगतिः॥परमेश्वरइतिमंत्रंपठित्वा॥सव्यहस्ततलेनलिंगंस्पृशेत्॥ ततःशिवनिर्णेज
नोदकंचुलुकमितंवारत्रयंपिबेत्॥तत्रमंत्रः॥कालमृत्युहरंपुण्यंब्रह्महत्याविनाशनं॥व्याधिघ्नंपुण्यपास्य
शिवनिर्णेजनोदकं॥इतिवैदिकोक्तप्रकारेणपूजापद्धतिः॥ ॥इतिश्रीमत्स्वामिसदानंदविरचितेशैवसुधा

करेवैदिकोक्तपार्थिवपूजानिरूपणंनामविंशःकिरणः॥२०॥ ॥आयुरारोग्यवृद्ध्यर्थंपशुपुत्रधनाप्तये॥ना
ममंत्रेणकर्तव्यंस्त्रीभिःपार्थिवपूजनं॥१॥स्त्रीभिःशूद्रैश्चकर्तव्यंधर्मकामार्थसिद्धये॥सदाश्रीपार्थिवेशस्यपूजनंना
ममंत्रतः॥२॥इतिपाद्मेस्त्रीशूद्राणामपिपार्थिवपूजाविधानात्॥तेषामपिनाममंत्रेणपद्धतिः॥पूर्वोक्तरीत्यादेश
कालादिसंकीर्त्यश्रीपरमेश्वरप्रीत्यर्थंपार्थिवलिंगपूजनमहंकरिष्ये॥हरायनमः॥मृदाहरणं॥महेश्वरायनमः
संघट्टनं॥शंभवेनमःप्रतिष्ठापनं॥देवस्यप्राणाजीवःसर्वेंद्रियाणिइहागत्यसुखेनचिरंतिष्ठंतु॥ध्यायेन्नित्यंमहे
शमितिदेवंध्यात्वा॥शूलपाणयेनमः।आवाहनं॥पिनाकधृषेनमःपाद्यं॥शिवायनमः॥इतिमंत्रेणार्घ्याचम
नस्नानवस्त्रयज्ञोपवीतगंधपुष्पधूपदीपनैवेद्यांतंकुर्यात्॥यद्वा॥शिवायनमइतिनमोंतेननाममंत्रेणैवस्त्री
शूद्रैःसर्वमपिपार्थिवेश्वरपूजनंकार्यं॥ ॥इतिश्रीमत्स्वामिसदानंदविरचितेशैवसुधाकरेस्त्रीशूद्रयोःपार्थि

वपूजानिरूपणं नामैकविंशः किरणः॥२१॥ अथैकादशी॥ एतद्व्रतं हि शैवानामपि विहितमस्ति॥ तथा च शिव
गीतायां॥ एकादश्यामुपोष्यैव यः पूजयति मां निशि॥ सोमवारे विशेषेण स मे भक्तो न नश्यति॥ शिवधर्मे॥ वैष्णवो
वाथ शैवो वा कुर्यादेकादशीव्रतं॥ सौरपुराणे॥ वैष्णवो वाथ शैवो वा सौरोप्येतत्समाचरेदिति॥ नंदीपुराणे॥ एका
दश्यष्टमी चैव पक्षयोरुभयोश्चतुर्दशी॥ शिवस्य तिथयः प्रोक्ता मुनिभिः शौनकादिभिरिति॥ एतन्माहात्म्यं नारदीय
पुराणे॥ एकादशीसमुत्थेन वह्निना पातकेंधनं॥ भस्मतां याति राजेंद्र अपि जन्मशतोद्भवं॥१॥ नेदृशं पावनं लो
के नराणां भूप विद्यते॥ यादृशं पद्मनाभस्य दिनं पातकहानिदं॥२॥ एकादशेंद्रियैः पापं यत्कृतं भवति प्रभो
॥ एकादश्युपवासेन तत्सर्वं विलयं व्रजेत्॥३॥ एकादशीसमं किंचित्पापत्राणं न विद्यते॥ स्वर्गमोक्षप्रदा ह्येषा रा
ज्यपुत्रप्रदायिनी॥४॥ सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनी॥ न गंगा न गया भूप न काशी न च पुष्करं॥ न चै
व कौरवं क्षेत्रं न रेवा न च वेदिका॥ यमुना चंद्रभागा च तुल्या भूप हरेर्दिनात्॥६॥ चिंतामणिसमा ह्येषाथवाक्षय-
निधेः समा॥ संकल्पपादपप्रख्या वेदवादोपमाथवा॥७॥ एकामेकादशीं वापि समुपोष्य जनार्दन॥ कामेनापि स
मभ्यर्च्य संसारान्मुक्तिमाप्नुयात्॥८॥ प्रसंगाद्वापि दंभाद्वा मोहाद्वा त्रिदशाधिप॥ एकादश्यां मनः॥ कृत्वा सर्वदुः-

श्री·सु स्वाम्यमुच्यते॥ ९॥ देवलः॥ न शंखेन पिबेत्तोयं न खादेत्कूर्मसूकरौ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥ १०॥
रटंतीह पुराणानि भूयो भूयो वरानने॥ न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे॥ ११॥ ननु यानि नञ्युक्तानि वाक्या
२२ नि श्रूयंते॥ तानि किं पक्षद्वयेपि भोजनप्रतिषेधपराणि॥ उत पर्युदासद्वाराऽभोजनसंकल्पविधिपराणि॥ इति चे
न्निषेधा एव॥ एते भोजनस्येति न्यायविदो मन्यंते॥ न भुंजीतेति प्रधानेन विधायकप्रत्ययेन सह नञः संबंधात्॥ त
त्यागेन नञः पर्युदासलक्षणायां च गौरवात्॥ न शंखेन पिबेत्तोयं इत्यादिभिः॥ संप्रतिपन्ननिषेधैः साहचर्येणैकत्र
पठितत्वाच्च॥ नैतेषु वाक्येषु पर्युदासकारणं॥ व्रतशब्दसामानाधिकरण्यादि दृश्यते॥ पर्युदासपक्षे च॥ गृहस्थो
ब्रह्मचारी चेत्यत्र वाक्ये पक्षद्वयेप्युपवासप्रसक्तेर्गृहस्थग्रहस्थग्रहणमनुपपन्नं स्यात्॥ भुक्त्वा कामेव सदा गृही स्यादिति
वाक्ये वक्ष्यमाणे विरोधात्॥ अतो भोजनप्रतिषेधा इमे॥ न चैतादृशेषु वाक्येषु वक्ष्यमाणव्रतविधायकवचनैका-
र्थ्यार्थं॥ मूलभूतप्रकृतिकल्पनागौरवाभावार्थं च संकल्पलक्षणैवास्त्विति वाच्यं॥ फलमूलत्वेन मूलकल्पनागौ
रवस्यादोषत्वात्॥ अन्यथा निषादस्थपत्यधिकरणमुक्तिश्चेत्॥ येषु पुनर्वचनेषु॥ नञ्संबद्धभोजनार्थकश २२
ब्दस्तेषु व्रतशब्दसमभिव्याहारो दृश्यते॥ तानि व्रतशब्दसामानाधिकरण्यबलात्॥ पर्युदासाश्रयणेनाभोज

नसंकल्पमितिपराशरः॥ यथा॥ पदमावयमाय गौतमेनाभ्युपदिष्टमे॥ स्मृत्यर्थसारेऽपि न नगेएकादशीकृतं॥ म
नक्तेनुनरः स्नात्वा प्रातरात्मनसाहरिं॥ एकादश्यांनभुंजीत सद्भक्त्यानुपमे॥ यामिनोपवासशब्देनापि भोजनरहित
शब्दवंत्विमतेषपिवचनेषु भोजनसंकल्प एव विधीयते॥ उपवासशब्दस्य तु तद्विशेषवाचित्वात् तु तत्राद्रव्यसं
कल्पविशेषवाचित्वात्॥ यथा॥ एकादश्यां तु पीतेऽपि पक्षयोरपि॥ यथा सूक्तात्याक्रमान विशेषोस्तिकश्चन॥
ब्रह्मवैवर्ते॥ न कुर्यादेकादशीव्रतमित्यादि॥ सद्यःफलं नाहारसहितेषु॥ यदीच्छेद्धरिसायुज्यं श्रियं संततिमेव वा॥
एकादश्यां पामत भुंजीत पक्षयोरुभयोरपि॥ इत्यादिषु भोजनसंकल्प एव पर्युदासस्य विधीयते॥ निषेधपरत्वे क
न संकल्पानुपपत्तेः॥ एतानि त्रिविधानि वाक्यान्येकादश्यां कीर्तितफलश्रवणकानि॥ इतिकर्तव्यता त्वित्थं॥ गृहीत्वौदुं
बरं पात्रं वारिपूर्णमुदङ्मुखः॥ उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः॥१॥ इति वाराहपुराणे॥ तथौदुंबरं ताम्रं तेन घटि
तमौदुंबरं॥ यथा संकल्पयेदिति अस्पष्टलोके ह्यनेकेति घोषः॥ अयं संकल्पस्तु प्रातरेव कर्तव्यः॥ तदुक्तं ब्रह्मवैवर्ते॥ प्रा
तर्हरिदिने सम्यग्विधाय नियमं निशि॥ दशम्यामुपवासस्य प्रकुर्याद्वैष्णवं व्रतं॥ संकल्पमंत्रश्च विष्णुरहस्ये तत्रोक्तः॥ एका
दश्यां निराहारः स्थित्वाहमपरेऽहनि॥ भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत॥ इत्यनेन मंत्रेण विद्वान्पुष्पांजलिं तत्रार्पये

शै·सु· त॥ शैवादीनां तु हेमाद्रौ सौरपुराणे॥ सावित्र्याप्यथवा नाम्ना संकल्पं तु समाचरेत्॥ सावित्र्या शिवगायत्र्या॥ शिव
गायत्री॥ ॐ तत्पुरुषायेति तामुच्चार्याद्यां मुक्त्वा अपरेऽहनि भोक्ष्यामीति वदेत्॥ यद्वा॥ शिवनामोच्चार्य तथा वदे
३४ त॥ पुंडरीकाक्षाच्युतस्थाने पार्वतीनाथ शंभुरिति वा ऊहः कार्यः॥ फलादिभक्षणे निराहार इत्यस्य स्थाने फलाहा
र इत्यहमित्यपि स्थाने अमिति वा ऊहः कार्यः॥ एवं संकल्पप्रयोगेपि॥ कृष्णैकादशीं तु॥ बोधिन्या ऊर्ध्वं शयिन्याः प्राक्
निष्कामैरवैष्णवगृहस्थैर्नोपवसनीया॥ भविष्योत्तरे॥ शुक्ला गृहस्थैः कर्तव्या भोगसंतानवर्द्धिनी॥ मुमुक्षुभि
स्तथा कृष्णा नेन तेनोपदेशिता॥ इति युधिष्ठिरं प्रति कृष्णवाक्यं॥ ते॥ तुल्यं॥ गोभिलः॥ एकादश्यां न भुंजीत पक्षयो
रुभयोरपि॥ वनस्थयतिधर्मोयं शुक्लामेव सदा गृही॥ त्यादिवाक्यैर्गृहस्थानां शुक्लायामेव व्रतविधानात्॥ क
र्तव्या॥ वनस्थयतिधर्म इति पदद्वयदर्शनादिदं वाक्यद्वयं व्रतविषयकमेव॥ निषेधपालनं काम्यव्रतं च सर्वैः कृ
ष्णायां सर्वगृहीणां संभवत्येव॥ निषेधानां विशेषानपेक्षत्वेन सत्यादिषु॥ उपसंहारायोग्यत्वेन गृहस्थेष्वपि प्रवृ
त्तिसंभवात्॥ पुत्रवांश्च सभार्यश्च स्वबंधुयुक्तस्तथैव च॥ उभयोः पक्षयोः काम्यं व्रतं कुर्यात्तु वैष्णवमिति नारदो
क्तेश्च॥ भविष्ये॥ यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा॥ तुल्ये ते मन्यते यस्तु स हि वैष्णव उच्यते॥ नारदी २

ये॥ नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः॥ पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणं॥ २॥ शयनाबोधिनीमध्ये।
याकृष्णैकादशी भवेत्॥ सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन॥ इति वचने॥ नान्या कृष्णेत्यनुवादः प्राप्तेर
भावात्॥ एकादश्यां तु कृष्णायां संक्रांतौ च रवौ तथा॥ पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही॥ १॥ इति वचनं॥
शयनीबोधिनीमध्यवर्तिकृष्णैकादशी पुत्रवतो गृहस्थस्य उपवासनिषेधपरं॥ अन्यथा गृहस्थस्य शुक्ला
यामेवोपवासविधानेन कृष्णायामुपवासप्राप्तेरेवाभावात्तद्वैयर्थ्यं स्यात्॥ ईदृशेषु वाक्येषु कृष्णादावुपवासस्य
पारणस्य निषेधो रव्यादिवारनिमित्तकस्तु तस्य तत्पूर्वदिनकर्तव्यतां ग पारणस्य च तु संक्रांतिरविवारयोरेका
दशी॥ तत्तु तस्य तयोरन्हो रेकादशीव्रतपारणस्य च॥ भृगुभानुदिनोपेता सूर्यसंक्रांतिसंयुता॥ एकादशी सदो
पोष्या पुत्रपौत्रप्रवर्द्धनीति विष्णुधर्मवाक्यविरोधात्॥ भानुवारादौ तु तेनु अमावास्या द्वादशी च संक्रांतिश्च
विशेषतः॥ एताः प्रशस्तास्तिथयो भानुवारस्तथैव च॥ अत्र स्नानं जपो होमस्तीर्थे देवादिपूजनं॥ उपवासस्तथा
दानमेकैकं पावनं स्मृतं इति मानं॥ पारणं तु॥ सकृद्वारादुपोष्ये च सर्वथा संयतेंद्रियः॥ सतु जन्मकृतात्पा
पात्तत्क्षणादेव नश्यती विज्ञानि नारदश्रुतं गुह्यारा॥ श्रोसातं॥ नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः॥ चंद्रार्कयो
ते

ग्रहणयोर्व्यतीपाते सुपर्वसु ॥ अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपं ॥ यः करोति प्रसन्नात्मा तस्य स्यादक्षयं
व्रतमिति ॥ संक्रांतिपूर्वदिनवृत्तांगतया संक्रांतौ प्राप्त उपवासनिषेधे तु किंचिद्द्रव्यं प्रकल्पयेत् ॥ नकुल्यमुपवासे
न उपवासफलं लभेत् ॥ निषेधोल्लंघनप्रयुक्तप्रत्यवायपरिहाररूपफलं ॥ भक्ष्यकल्पना च ॥ वायुपुराणे ॥
नक्तं हविष्यान्नमनोदनं च फलं तिलाः क्षीरमथांबु चाज्यं ॥ यत्पंचगव्यं यदि वापि वायुः ॥ प्रशस्तमत्रोत्तरमुत्त
रं यत् ॥ २ ॥ अग्न्याधानवीक्षमेवचौद्धं ॥ मार्कंडेयस्त्वनुकल्पांतरमप्याह ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥
उपवासेन दानेन निर्द्वादशिको भवेत् ॥ इति हविष्याणि ॥ हैमंतिकं सिता स्विन्नं धान्यं मुद्गास्तिला यवाः ॥ कलाय
कंगुनीवारा वास्तूकं हिलमोचिका ॥ षष्टिकाः कालशाकं च मूलकं केमुकेतरत् ॥ लवणे सैंधवसामुद्रे गव्ये
च दधिसर्पिषी ॥ पयोनुद्धृतसारं च पनसाम्रहरीतकी ॥ तिंतिडी जीरकं चैव नागरंग च पिप्पली ॥ अमृतं वर्कं मु
नयो हविष्यान्नं प्रचक्षते इति बौधायनं ॥ अन्यच्च ॥ नारिकेरफलं चैव कदली लवली तथा ॥ आम्रमामलकं चैव
न संचयहरीतकी ॥ व्रतान्नमेव ॥ [illegible] ॥ [illegible] ॥ [illegible] शीते पैर्वा [illegible] चार्यादिति
: सर्वकार्ये ॥ [illegible] ॥ [illegible] ॥ [illegible] ॥ [illegible] मुपवसेत्य [illegible] वीति

गृहस्थस्य स्वकर्मैकादश्यादिव्रतनिषेधस्योक्तत्वात् ॥ मत्स्यो गृहस्थातिरिक्तः ॥ गृहस्थो ब्रह्मचारी च योऽनश्नंस्तु त-
पश्चरेत् ॥ प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः ॥ इति वचस्तु निरंतरोपवासनिषेधकमित्यन्यत्र विस्तरः ॥
आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ॥ अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतामित्यापस्तंबवचनं तु ॥ अग्निहो-
त्रादिनिरोधकाम्यादिजनकोपवासनिषेधकमिति ॥ उचितमेव चैतत् ॥ यत्तेषां श्रौतानुष्ठायिनां नित्यस्याप्यस्य-
स्मार्तस्यानुकल्पादिना निर्वाहणं ॥ सत्यां वृत्ते न दौर्बल्यसंभावनायां ॥ उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह ॥ उपवासः
स विज्ञेयो नोपवासस्तु लंघनं ॥ पापेभ्यो व्रतांगतया निषिद्धेभ्य उपावृत्तस्य ॥ गुणैर्हरिहरस्मरणनामकीर्तनार्चनैः स-
हवासोऽवस्थानमहोरात्रं स उपवासः ॥ सर्वभोगविवर्जितो ज्ञेय इत्यर्थः ॥ तस्मादितरसत्कर्मलोपो न भाव्यः ॥ तदर्थं न-
क्तादिरनुकल्पाः कार्याः ॥ असत्यंभाषणं द्यूतं दिवास्वप्नं च मैथुनं ॥ एकादश्यां न कुर्वीत उपवासपरो नरः ॥ पतितं-
पाखंडिसंभाषानृतस्तेयादिकं वर्जयेदिति ॥ तथा ॥ असकृज्जलपानाच्च तांबूलस्य च भक्षणात् ॥ उपवासो विनश्येत
दिवास्वापाच्च मैथुनात् ॥ ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनं ॥ व्रतेष्वेतानि चत्वारि वशिष्ठानीति निश्चयः ॥ आमिषं
मांसं ॥ तस्य वर्जनं [illegible] ॥ उपवासदिने श्राद्धाभावात् ॥ यद्वा ॥ आमिषं हरिपानीयं गोभर्जक्षीरमामिषं ॥ मसू-

रमामिषं तस्यैकले जंबीरमामिषं॥ आमिषं शुक्तिकाचूर्णमामिषं महिषीपयः॥ आमिषं इति पानीयमारनालं तथामि
षमिति स्मृत्यंतरोक्तात् न मामिषं ग्राह्यं॥ तन्नु॥ एकादश्यां निषिद्धं॥ स्त्रीणां तु प्रेक्षणात्॥ स्पर्शात्ताभिः संकथनादपि।

निःस्यंदते ब्रह्मचर्यं न दारेष्वृतुसंगमात्॥ भावसहिते न चेतसा स्त्रीणां प्रेक्षणादिभिः ब्रह्मचर्यं निःस्पंदते॥ अत्रापतीत्य
भिप्रायः॥ उपवासे तथा श्राद्धे न कुर्याद्दंतधावनं॥ दंतानां काष्ठसंयोगो हंति सप्तकुलानि वै॥ दंतशोधनमंत्रनिषि।
ध्यते॥ येन केन चित्काष्ठग्रहणं निंदार्थवादगतमविवक्षितं॥ निषेधस्य निवृत्तिफलत्वेन विशेषस्यानाकांक्षितत्वात्
॥ अमृताः शर्करा उपदधातीति विधुद्देशस्य॥ पुनर्विशेषमनुवादाय सामान्यानुष्ठानानुपपत्तेराकांक्षितो वि
शेषस्तेजो वै घृतमिति वाक्यशेषगतो गृह्यते॥ अन्ये तु॥ अलाभे चा निषेधे वा काष्ठानां दंतधावनं॥ पर्णादिना वि
शुद्धेन जिह्वोल्लेखः सदैव चेति॥ पैठीनसिवचनाद्लाभे॥ दंतकाष्ठानां निषिद्धायां तथा तिथौ॥ अपां द्वादशगंडू
षैर्विदध्याद्दंतधावनं॥ इति व्यासवचनाच्च जिह्वोल्लेखनं दंतशोधने कार्यं॥ इत्यर्थवादगतो विशेषो विवक्षि
तइत्याहुस्तद्वन्न॥ जिह्वोल्लेखनस्य दंतधावनत्वाभावाद्गौणोऽत्र दंतधावनव्यवहारः॥ च॥ पादद्वरणे॥ सर्वगंडूषाणां
मुखांतरगतसर्वावयवशोधकत्वेनात्र दंतधावनपदप्रयोगेपि दंतधावनमात्रधावके एव लोके दंतधावनेव्यव

हारादेस्तन्निषेधाऽसंकरे वानुपर्णानाचारेण काष्ठेतरेण निषिद्धचूर्णादिना पत्रेण वा दंतमार्जनमकार्यमेव।। यदि
तु पैठीनसिवाक्ये दंतधावननिषेधस्य मुख्यार्थत्वं चकारस्य समुच्चयार्थकत्वं तर्हि अन्योक्तमेव वरम्।। यत्तु।। स्त्रिया
इति प्रक्रम्य।। पुष्पालंकारवस्त्राणि धूपगंधानुलेपनं।। उपवासेन दुष्यंति दंतधावनमंजनं।। इति व्यासोक्तं।। तत्सभ
र्तृकाणां भर्तृसमीपवर्तिनीनां वनितानां वेदितव्यं।। स्मृत्यंतरे च।। नेत्रांजनं सतांबूलं सिंदूरं रक्तवाससी।। विभूषया
सोपवासापि सर्वदा भर्तृवृद्धये।। अत्र काम्योपवासवाक्येषु।। बहुविधाः नियमाः दृश्यंते।। ते च विस्तरभयान्न लि
ख्यंते।। इत्यस्यतोऽवसेयाः।। ते च काम्यकर्मस्वावश्यमपेक्षिताः।। तत्र सर्वांगोपसंहारनियमात्।। नित्यकर्मणि
तु यथाशक्त्या कुर्यात्तथा कुर्यादिति।। इति विज्ञाय कुर्वीत तावत्स्वयमेकादशीव्रतं।। विशेषनियमाशक्तो हेरात्रं भुक्ति
वर्जितः।। २।। इति माधवीये।। ब्रह्मवैवर्तात्।। किं च।। प्रधानस्योपवासस्याप्यसामर्थ्ये यदैकभक्तादीनि विधीयंते
।। तदेति कर्तव्यता सुकाकथा।। तथा मार्कंडेयः।। एकभक्तेन नक्तेन तथैवायाचितेन च।। उपवासेन दानेन न नि
र्द्वादशिको भवेत्।। स्मृत्यंतरे च उपवासे त्वशक्तानामशीतेरूर्ध्वजीविनां।। एकभक्तादिकं कार्यमाह बौधायनो
मुनिः।। १।। एकभक्तादिकमुक्तं।। अत्रापवादकाबनुकल्पमाह।। कात्यायनः।। पितृमातृभ्रातृपर्थे आचार्यार्थे विशे

श्री·सु मतः॥ उपवासं च कुर्वाणः पुण्यं शतगुणं लभेत्॥२॥ यमुद्दिश्योपकृतः॥ सोपि संपूर्णफलमाप्नुयात्॥ इत्यादि व
तिनिषेधोऽन्यत्रापि ज्ञेयाः॥ एवं॥ कांस्यं मांसं मसूरं च क्षौद्रं चानृतभाषणं॥ पुनर्भोजनमत्यांबु द्वादश्यां परिवर्जये
२१ त्॥ इति स्कांदोक्तं॥ कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभाषणं॥ व्यायामं च प्रवासं च मैथुनं तिलपिष्टं मसूरं द्वादश्या
म्यादिषु वर्जयेदिति मात्स्योक्तं॥ अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः॥ अवनीतल्पशायिनः प्रियासंगवि
वर्जिताः इति दशमीकृत्यस्य नारदीयोक्तं॥ दशम्यामेकभक्तं तु कुर्वीत नियतेंद्रियः॥ आचम्य दंतकाष्ठं तु खादे
द्दंतदनंतरं॥ इत्यादि स्मृत्यंतरोक्तं च नियमजातं कार्यं व्रतपरैरेव॥ सर्वोदाहृतवाक्यात्॥ सायमाद्यंतयोरह्नोः सा
यंप्रातश्च मध्यमे॥ उपवासफलप्रेप्सुर्जह्याद्भक्तचतुष्टयं॥ अथ मिश्रोपवासी चेत्सायंप्रातर्भुजिक्रियां॥ वर्जयेन्म
तिमान् विप्रः संप्राप्ते हरिवासरे॥ इति विष्णुरहस्यवचनाच्च॥ भोजनद्वयनिषेधमात्रे तु भोजनवर्जनमात्रमिति कर्त
व्यतापत्त्यं॥ एतावानेव हि व्रतनिषेधपरिपालनयोर्विशेषः॥ यद्व्रते समस्तांगानां नियमपरिपालनं॥ इतरत्र नेति॥
अत एव कृष्णपक्षगृहस्थानां व्रतनिषेधेपि भुजिवर्जनरूपनिषेधपरिपालनमस्त्येवोपवासनिषेधे तु किंचिद्भक्ष्यं च २१
न्यथेति सुसंगतं॥ अत एवान्नमाश्रित्य तिष्ठंतीति निंदावाक्यगतोऽन्नशब्दोऽदनीयपरो न पच्येदन्नमात्मन इति वत्॥

ऽयं च निषेधः॥ काम्यजन्मनक्षत्रादिनिषेधवन्नित्य एव॥ व्रतं तु संयोगपृथक्त्वन्यायेन नित्यं काम्यं च॥ तत्रोभयोरे कप्रयोगसत्त्वान्निषेधस्य व्रतानुष्ठानेनैव सिद्धिः॥ पूर्वोक्ततिथिग्रहणनियामकानां वाक्यानां विहितकर्मविशेषविषयक त्वदर्शनेन व्रतमात्रविषयत्वात्॥ निषेधमात्रपरिपालनात्मिकायां भोजननिवृत्तौ न तेषां प्रवृत्तिः॥ किंतु॥ यावदेका दशी तावत्सा न भोक्तव्यं॥ तिथिमात्रसंबंधेन एकादश्यां न भुंजीतेत्यादिनिषेधप्रवृत्तेः॥ निषेधस्तु निवृत्त्यात्मा॥ काल मात्रमपेक्षते॥ इति देवलोक्तेश्च॥ निर्णयसिंधौ तु॥ दशम्यां एकादशी वर्जनोक्तेपि एकादशी मात्रस्य न भोक्तव्यं देवला वचनादेव इत्युक्तं॥ श्राद्धे तु॥ अन्नाघ्राणं कर्तव्यं॥ मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदा॥ अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसेवितं॥१॥ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्॥ उपवासं तदा कुर्यादाघ्राय पितृसेवितं॥२ ॥इति वचनाभ्यां॥ अत्र व्रतलोपे प्रजापत्यादिकमन्यदपि द्रष्टव्यं॥ कायिकादिनियमरूपांगलोपे तु॥ तत्तारतम्ये न तस्य प्रायश्चित्तार्थं सकृदसकृद्वैतन्मंत्रजपः॥ यथाह विष्णुधर्मेषु॥ शारीरमंतःकरणोपघातं वाचं च विष्णुर्भगवान शेषं॥ शमं नयत्वस्तु ममेह शर्म पायादनंतो हृदि संनिविष्टः॥१॥ अंतःशुद्धिं बहिःशुद्धिं शुद्धो धर्मनयो च्युतः॥ सकरो त्वमलेतस्मिन्स्थितिरेवास्मि सर्वदा॥२॥ वाक्सोपघाता नन घोषो धां[illegible]भगवानजः॥ शमं नयत्वभिध्यात्मा विष्णुश्चेतसि

संस्थितः ॥ ३ ॥ अत्रापि शैवैर्यथासंभवं शिवनाम्ना ऊहः कार्यः ॥ ननु दशमीविद्धैकादश्युपवासो न कार्य इत्यु
त्सर्गः ॥ उदयोपरि विद्धा तु दशम्यैकादशी तिथिः ॥ दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासनः ॥ इति कण्ववाक्यात् ॥
दशम्यनुगतायन्तु तिथिरेकादशी भवेत् ॥ तत्रापत्यविनाशः स्यात्परेत्य नरकं व्रजेदित्यादिनारदादिवाक्येभ्य प्रा
ईदशानामपि वाक्यानां बाधकान्यप्युपन्यस्यन्ते इति विद्धोपवासाकरणमुत्सर्गः ॥ अयं च वेधः सूर्योदये बोध्यः ॥ सू
र्योदयस्यैव दिनविभागप्रयोजकत्वात् ॥ ज्यौतिःशास्त्रसिद्धतिथ्यारंभकाले दशमीसंयोगस्य सर्वत्र सत्त्वेन तस्यापरि
हार्यत्वात् ॥ सूर्योदयस्पर्शात्त्वेव दशम्या गर्हिता सदेति ॥ अतिवेधादयः सर्वे नैवेधा इति विबुस्मृताः ॥ सर्वेष्वेव धावि
ज्ञेया वेधः सूर्योदये स्मृतः इति ॥ आदित्योदयवेलायां आरभ्य षष्टिनाडिकाः ॥ संपूर्णैकादशी नामेत्यादिवचनेभ्यश्च
॥ यानि तु ॥ अरुणोदयवेलायां दशमी यदि संगता ॥ संपृक्तैकादशीं तां तु मोहिन्यै दत्तवान्विभुरिति ॥ प्रतिपत्प्रभृत
यः सर्वा उदयादोदयाद्रवेः ॥ संपूर्णा इति विख्याताः शिवासरवर्जिता इति ॥ आदित्योदयवेलायाः प्राङ्मुहूर्तद्व
यान्विता ॥ एकादशी तु संपूर्णा विद्धान्या परिकीर्तिता इत्यादिवाक्यानि तानि तु वैष्णवविषयाणि ॥ दशमीवेधसंयु
क्तो यदि स्यादरुणोदयः ॥ नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति गरुडवचनेन ॥ तेषां वैष्णवविषयत्वेनोपसं

स्मारात्‌॥ एतेनारुणोदयवेलाया इत्यादिवाक्यप्रामाण्यात्स्मार्तानामप्यरुणोदयवेधो मुख्यः॥ वैष्णवानामरुणोदयवे
ध एवेति॥ नैवोष्यं वैष्णवेनैत्यैवकारस्वारस्याल्लभ्यमित्यपास्तम्‌॥ सामान्यविषयस्य वचनस्य॥ वैष्णवविषयत्वेनो
पसंहारात्‌॥ एवकारस्य भवदुक्तरीत्या वैष्णवानां सर्वथा तत्त्यागबोधकत्वे पीतरेषामपि तत्त्यागबोधने सूर्योदये दश
मीस्पर्शे विद्धा इति बोधकवाक्यानां संकोचे बीजाभावात्‌॥ नह्यार्थिकार्थमादाय साक्षाद्वचनसंकोचः संभवति॥ श्रुता
र्थे चरितार्थस्याश्रुतार्थसंकोचस्यैव न्याय्यत्वात्‌॥ यत्तु॥ उदयात्प्रागनुदृश्येन व्याप्तिन्यैकादशी यदा॥ संयुक्तैकादशी
नाम वर्जयेद्धर्मवृद्धये॥ पुत्रपौत्रसमृद्ध्यर्थं द्वादश्यामुपवासयेत्‌॥ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं॥ इति का
म्योपवासस्यारुणोदयवेधे निषेधबोधकं वचनं॥ तत्रैवकारबोधस्य वैष्णवानां सर्वथा तदकरणस्यैवोपोद्बलकम्‌॥
यत्तु॥ इदं वचनं वैष्णवेतरविषयं वैष्णवानां नित्यस्यापि ह्यरुणोदयवेधे निषिद्धत्वादित्याहुस्तन्न॥ एतस्य तादृशानेकवा ॥
चकत्वापेक्षया नित्योपलक्षकतायामेव लाघवात्‌॥ अलमतिप्रपंचेन॥ सैषैकादशी शुद्धा विद्धा चेति द्विधा॥ शुद्धा
चतुर्धा॥ उभयाधिका॥ एकादशीमात्राधिका॥ द्वादशीमात्राधिका॥ अनुभयाधिका च॥ विद्धापि चतुर्धा उभया
धिका॥ एकादशीमात्राधिका॥ द्वादशीमात्राधिका॥ उभयानधिका चेति तत्र तावत्‌॥ शुद्धाधिकाधिकद्वादशीका यथा

चं	२०	६०
मं	२१	६०
बु	२१	१
बृ	२२	२

अत्र बुधे उपवासः इत्येके। गौणे इत्यन्ये। स्कांदे। पूर्णाप्येकादशी त्याज्या वर्द्धते द्वितयं यदि। तथा ॥ अविद्धापि च विद्धा स्यात्परतो द्वादशी यदि। २। भृगुर्नारदौ। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ॥ तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि। परतस्त्रयोदशी पारणम्। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ॥ सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति च नारदः। ३। न चैतानि दशमीवेधविषयाणीति वाच्यं। विनिगमकाभावात्। न हि वैष्णवानां विद्धात्यागवत्। शुद्धवृद्धात्यागे एतादृग्वाक्यातिरिक्तं प्रमाणमस्ति। येन तदेकार्थत्वार्थमीदृग्वाक्यान्यपि तद्विषयाणि स्युरित्येके। अन्ये त्वेतेषु वाक्येषु पूर्णत्वं च सूर्योदयादारभ्य वर्तमानत्वं। न त्वरुणोदयादारभ्य वर्तमानत्वं। अप्रसिद्धत्वात्। ॥ ॥ ॥ अरुणोदयवेधवाक्यानां वैष्णवविषये उपसंहारस्य दर्शितत्वेन सामान्यशास्त्रार्थव्यवस्थापकत्वानुपपत्तेश्चेति वैष्णवान्प्रतीयं विद्धैव। इति दशमीशेषसंयुक्तेति गरुडवचने नैमित्तिकवचनान्येकार्थकानीति स्मार्तानां पूर्वत्यागे मानाभावः। न चैवमेषां वैपरीत्यं ॥ ग्रंथांतरस्थस्य ग्रंथांतरस्थेनाविपर्ययात्। उपसंहारकेणोपसंह्रियमाणानां गतार्थत्वेप्यदोषाच्च। एतदेकवाक्यतयैवाविद्धापि चेति स्कांदवाक्यमपि सूर्योदये विद्धायां वैष्णवविषयम्। अत एवोदाहरिष्यमाणे। पुनः

प्रभातसमयेइत्यादिवसिष्ठवाक्ये॥ परतो द्वादशी न चेदिति द्वितीयश्लोकद्वितीयपादः संगच्छते॥ गौणे
त्वपरतो द्वादश्यपां सत्यामपि॥ तेषां परस्यैव व्रतस्य सत्वे नार्थं पादेन संगच्छेत॥ इति स्मार्तैः पूर्वैर्बोध्यं॥ सामा
न्यवाक्ये यद्यप्याहुः॥ ॥ शुद्धाधिकानधिकद्वादशीकार्यथा॥ गृहिणां मौनां॥ इतरेषां विधवानां च वृद्धेरुप

शु	१०	५८
सं	११	६०
शु	१२	२
शु	१३	५५

वासः॥ नारदः संपूर्णैकादशी यत्र द्वादशीं वृद्धिगामिनी द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणं॥ स्कंदे॥
प्रथमेऽहनि संपूर्णा व्याप्याहोरात्रसंयुता॥ द्वादश्यां तु तथा तात दृश्यते पुनरेव च॥ १॥ पूर्वा कार्या गृहस्थै
स्तु यतिभिश्चोत्तरा विभो इति॥ सर्वैरेवोत्तरा कार्या इत्युदाहृतवाक्ये सर्वपदोपादानादुभयाधिक्ये
॥ ॥ ॥ ॥ ॥ सकामानां नानेन वाक्येन पूर्वैकादशीव्रतविधानं॥ अत्र गृहस्थपदं यतिपदं स
कामनिष्कामपरे॥ अत एव निष्कामस्तु गृही कुर्याद्युत्तरैकादशीव्रतं॥ प्रातर्भवतु वा मा वा द्वादशी यदि जोशनः
॥ २॥ इति स्कांदे॥ एवं निष्कामगृहिणोऽपि उत्तरत्रोपवासो विहितः॥ एवं च वनस्थादेरपि संग्रहो भवति॥ अत ए
व॥ पुनः प्रभातसमये घटिकैका यदा भवेत्॥ अत्रोपवासो विहितो वनस्थस्य यतेस्तथा॥ १॥ विधवायाश्च तत्रै
व परतो द्वादशी न चेत्॥ इति वसिष्ठः॥ इदं स्कांदादिवाक्यैकवाक्यतया संपूर्णैकादशी यत्र द्वादश्यामित्यु-

नी॰सु॰ क्तं नारदवचनमपि निष्कामपरं॥ यद्वा॥ नारदवचनमुत्तमत्वाधिक्यपरं॥ उदाहृतस्कांदादिवाक्यैकवाक्यत्व
लाभात्॥ ईदृशबहुविधवचनानुरोधादेवतु॥ एकादशी विद्धा चेत्तस्मिन्के कुर्वन्ति व्रतं॥ उत्तरेतु व्रतिः
९० कुर्यात्पूर्वामेवसदागृहीतिस्कांदवाक्ये निष्कामपदं निर्गतीविष्णुप्रीत्यतिरिक्तः कामोयेषामितिव्युत्पत्त्या वैष्ण
वविषयं॥ वैष्णवगृहस्थस्यापिगृहस्थत्वेन स्कांदादिवाक्यैः॥ पूर्वोक्तव्रतासोद्भवमुत्तरविधानं संगच्छते॥ एवं च गृ
हस्थपदयतिपदयोर्द्वयोर्नलक्षणा॥ एतदनुसारेणैवेतरवचनव्यवस्थापि बोध्या॥ एवं च वसिष्ठवाक्यस्थपूर्वा
दिपदानि वैष्णवपराणीत्यपि केचित्॥ विष्णुप्रीतिकामैः स्मार्तैस्तु द्वे तिथी उपोष्ये॥ तदाह वृद्धवसिष्ठः॥ संपूर्णैका
दशी यत्र प्रभाते पुनरेव सा॥ लुप्यते द्वादशी तत्र उपवासः कथं भवेत्॥१॥ उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्प
रैः॥ स्कांदेतु॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ त्रयोदशी न यः काले उपोष्या तत्र का भवेत्॥ उपोष्ये द्वे ति
थी तत्र विष्णुप्रीणनतत्परैरित्यत्र तपःकालशब्दो द्वादश्या अनधिकोपलक्षकः॥ अत्र एकाधिकारिकत्वे
पि च निर्णीतवृत्तिः॥ अत एव दृशवचनानां साफल्यं एतेन सकामनिष्कामयोः॥ पृथक्कृत्वा विधाय कानि ९०
दंभिन्नाधिकारिकं वचनांतरैकवाक्यत्वलाभात्॥ अन्यथा॥ आहृतेस्योगाद्वितिप्रसुक्तं॥ शुद्धानधिकारि

कद्वादशीकार्यथा॥ ॥भौमेउपवासः॥ नारदः॥ नचेदेकादशीविद्धौ द्वादशीयरतःस्थिता॥
उपोष्यैकादशीतत्रयदीच्छेत्परमंपदमिति विष्णुर्द्वादशीपरतस्त्रयोदश्यां॥ अत्र चतुर्थपादोर्थवादः॥
अतएवस्कांदे॥ शुद्धायदासमाहीनासमाहीनाधिकोत्तरा॥ एकादशीमुपवसेत्तन्नशुद्धांवैष्णवीमपि॥
इतिसामान्यतोविधिनिषेधौसंगच्छेते॥ उत्तराद्वादशी॥ अतएव॥ अविद्धापिचेतिस्कांदवचनं॥
वैष्णवपरं॥ ताहृशाबाकौकवाक्यतालाभाच्च॥ एवं॥ एकादशीभवेत्पूर्णापरतोद्वादशीयदि॥ तदात्वेकाद-
शींत्यक्त्वाद्वादशींसमुपोषयेदित्यादिवाक्यान्यपि॥ संपूर्णैकादशीयात्याज्यापरतोद्वादशीयदि॥ उपोष्याद्वादशी
शुद्धाद्वादश्यामेवपारणं॥२॥ इतिवभागवततंत्रपठितत्वाद्वैष्णवविषयमेव॥ अतएवनचेदेकादशीविद्धा वि-
ष्णुदात्तवाक्यविरोधोन॥ एवमन्यान्यपि॥ एकादशीशुद्धत्वेशुद्धद्वादशीव्रतविधायकानिवाक्यानिवैष्णवपर-
त्वेनव्याख्येयानि॥ यत्तु॥ दशमीवेधोदयेहृहन्नारदीये॥ संपूर्णैकादशीशुद्धाद्वादश्यांनैवकिंचन॥ द्वादशीचत्र-
योदश्यामस्तितत्रकथंभवेत्॥ पूर्वागृहस्थैःकार्यास्यादुत्तरायतिभिस्तिथिरिति॥ तत्तुअनाकरत्वादनादेयं॥
॥ शुद्धानधिकानधिकद्वादशीकार्यथा॥ ॥भौमेउपवासोःसंदेहात्॥ शुद्धायदासमेतिस्कांदाच्च॥ विद्धाधिका

च	१०	दृ	५८
मं	११	५५	६०
बु	१२	१०	
इ	१२	२	

सु

सो	१०	६०	
मं	११	५६	घ ६०
बु	१२	६०	५८
बृ	१३	५५	

धिकद्वादशी कार्यथा॥ सर्वेषां सोमे उपवासः॥ कण्वः॥ उदयोपरि विद्धा तु दशम्यैकादशी तिथिः॥ दान
वेभ्यः॥ अर्णमार्थं दत्वा व्याकर्णासनः॥२॥ उदयः सूर्योदयः॥ उदयपदेन झटित्युपस्थितेः॥ दशम्याः
शांतमादाय यद्यो देति दिवाकरः॥ तेमस्पृष्टं हरिदिनं दत्तं जंभासुरस्य तु॥ इति स्मृत्यंतराच्च॥ इमे वाक्ये स्मा
र्तविषय एव॥ वैष्णवानां त्वरुणोदयवेधनिषेधादेव प्राप्तः॥ सामान्यवेधनिषेधवाक्यान्यपि वैष्णवे
षि वस्मार्तेष्वपि प्रवर्तंत एव॥ विनिगमनाविरहात्॥ ॥ विद्धाधिक्याने धिकद्वादशी कार्यथा॥ ॥

सो	१०	१	०५५
मं	११	२	
बु	१२	३	
बृ	१३	४	

अत्रा गृहिणां सोमे उपवासः॥ गृहिणां तु नोपवासः॥ किंतु सोमे नक्तं॥ पद्मपुराणे॥ द्वादशी मिश्रि
ता कार्या सर्वत्रैकादशी तिथिः॥ द्वादशी च त्रयोदश्यां विद्यते यदि वा न वा॥१॥ तथा॥ सर्वत्रैका
दशी प्राप्त्या द्वादशी मिश्रिता नरैः॥ प्रातर्भवतु वा मा वा यतो नित्यमुपोषणमिति॥ त्रयोदश्यां द्वादशी सत्वे सत्वे वै
कादशी द्वादशी मिश्रितैव कार्या॥ व्रतस्य मुख्यत्वे न त्रयोदश्यां सत्वस्य तु ना प्रयोजकत्वादिति समुदायार्थः॥ नारदः
द्वादश्येकादशी यत्र संगता विदशापि वा॥ तामुपोष्य ततः कार्यं त्रयोदश्यां तु पारणं॥२॥ परतः एकादशी कलायां ८१
र्ध्वं॥ इमानि द्वादश्याः॥ सूर्योदयपर्यंतत्वे तदुपास्तो मानानि॥ ततो न्यूनत्वेपि सैवोपोष्या॥ तथा च कूर्मपुराणे॥ ॥

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ॥ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं ॥१॥ स्कांदः ॥ एकादशी द्वाद
शी च रात्रिशेषे त्रयोदशी ॥ सोपोष्या च प्रयत्नेन महापुण्यविवर्द्धनी ॥१॥ इति ॥ अत्रैकेचिद्विधेपि स्वये पुत्रव
द्गृहिणां नक्तं ॥ न तूपवासः ॥ तथा च कौर्म्मे ॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ॥ उपवासं न कुर्वीत पुत्र
पौत्रसमन्वितः ॥ वृद्धशातातपः ॥ एकादशी यदा विद्धा द्वादशी च क्षयं गता ॥ क्षीणा सा द्वादशी ज्ञेया नक्तं तत्र वि
धीयते ॥२॥ गृहिणां इति शेषः ॥ उक्तवाक्यानुरोधात् ॥ अत एव ॥ एकादशी कलाप्यत्र द्वादशी च क्षयं गता ॥ तत्र
नक्तं प्रकुर्वीत नोपवासं गृहाश्रमी ॥ इत्यपि पुत्रि विषयमेवेत्याहुः ॥ कौर्मस्थ पुत्रपौत्रसमन्वित इति पदं योग्य
तापरत्वेन गृहिबोधकं ॥ एतदनुरोधादिति तु युक्तम् ॥ त्रयश्चात्राविशेषात् ॥ सूर्योदयात्प्राक् निवृत्तिरूपस्त
स्यैतत्स्वरूपश्चयात्स्यः ॥ एवं च पारणाहे न लभेत इत्यादिवक्ष्यमाणवाक्यानुमत्या नाधिक्यविषयाल्पेव ॥ ॥

बु	१०	१	
म	द्वा	६०	
गु	द्वा	१	
शु	१३		

विद्धानधिकद्वादशीकार्यथा ॥ ॥ सर्वेषां सोमेनुपवासः ॥ एकादशी यदेति वक्ष्यमाणपाद्मात् ॥
बृहन्नारदीये ॥ एकादशी यदा विद्धा द्वादश्यां न व्रतीयते ॥ द्वादशी च त्रयोदश्यामस्ति तत्र कथं भवे
त् ॥१॥ उपोष्या द्वादशी तत्र सर्वैरेव न संशयः ॥ एतदनुसारेणैव ॥ एकादशी यदानुत्तापरतो द्वा

दशी न वेत्॥ उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति व्यासवाक्ये चतुर्थपादोऽर्थवादः॥ सर्वेषां परमोपवासस्यै
वेष्टत्वात्॥ एकादशीनिमित्तोऽप्युपवासो वचनबलाद्द्वादश्यां यतो नास्ति वचनस्यातिभारः॥ इत्याहुस्तदेवं बोध्य।
मिदं वचनद्वयं वैष्णवविषयं॥ सर्वैरित्यस्य सकामैर्निष्कामैश्चेत्यर्थः॥ एकादशी यदा विद्धा परतोपि न वर्द्धते॥ य
तिभिर्गृहिभिश्चैव सैवोपोष्या द्वये तिथिरिति पाद्मे॥ अयं सामान्यतो दशमीविद्धायानुपवासस्य विधानात्॥ न चो॥ दा
हृतवाक्यद्वयानुसारेणैतदनुपयानाधिकापरमेवास्त्विति वाच्यं॥ एतदनुसारेणैतयोर्वैष्णवविषयताया एव वक्तु
मुचितत्वात्॥ न चात्र विनिगमकाभावः॥ विनिगमकान्तराभावेऽपि संप्रदायस्य विनिगमकत्वात्॥ न च॥ दिनत्र
यस्पृष्टे दिने नोपोष्या दशमीयुता॥ सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशी॥ इति स्कान्दवचने काम्यैवास्योनया नाधि
कापरत्वं॥ इति वाच्यम्॥ हित्वैकादशी यत्र तत्र संनिहितो हरिः॥ तामेवोपवसेत्काममकामो विष्णुतत्परः॥ इति
कूर्मपुराणवचने काम्येनास्य वैष्णवविषयत्वात्॥ ईदृशविषये वैष्णवानामपि वचनादेव दशमीविद्धोपवास
स्य वक्तुमुचितत्वात्॥ इति॥ एवं च यद्दिदेवातुसंसिद्धेरितिवक्ष्यमाणनारदवचनं स्कान्दादिवाक्यानि च तद्वि
षयाणि॥ अत एव॥ एकादशी न लभ्येत सा द्युदाहरिष्यमाणकृष्णशृंगादिवाक्येषु न संकोचः॥ उभयत्र तु वैष्ण।

वविषयकाण्यपिवाक्यानितत्रातिविरोधाभावादुदाहरिष्यंते॥ ॥विद्धानधिकानधिकद्वादशीयथा॥ ॥

बु	१०	१	१५।५०
मं	१२	५५	४ ५८
गु	१२	५७	

सर्वेषांसोमेउपवासः॥स्कांदे॥विद्धाप्यविद्धाविज्ञेयापरतोद्वादशीनचेत्॥इति॥पारणाहे
नलभ्येतद्वादशीकलयापिचेत्॥तदानींदशमीविद्धाप्युपोष्यैकादशीतिथिरितिवाक्यांतरे
पद्मपुराणे॥एकादशीदिशाविद्धापरतोपिनवर्द्धते॥यतिभिर्गृहिभिश्चैवसेवोपोष्यात्रयेति
थिरिति॥नवर्द्धतइतिसाम्याभिप्रायेण॥त्रयइतिन्यूनताभिप्रायेण॥यद्यपिचात्रएकादश्याएवअनाधिक्य
मुक्तं॥तथापिद्वादश्याअपितद्बोध्यं॥दिनत्रयमृतेदेविनोपोष्यादशमीयुता॥सेवोपोष्यासदापुण्यापरतश्चे
त्र्योदशीतिस्कांदात्॥अतएव॥यदितुदैवात्संसिद्धेदेकादश्यांदिनत्रयं॥तत्रक्रतुशतंपुण्यंद्वादशीपारणेभ
वेत्॥इतिनारदवचनं॥द्विस्पृगेकादशीयत्रतत्रसंनिहितोहरिः॥तामेवोपवसेत्कामंकामोविष्णुतत्परः॥ १॥
इतिकूर्मपुराणवचनंचोन्नयानाधिक्यपरं॥एकादशीयदाविद्धेतिद्वादश्यापाधिक्योपरोपवासविधानेनैतयोर्बा
धात्॥एवमभिमवाक्यद्वयेविबोध्यं॥दशमीद्वादश्योःस्पृशातीतिद्विस्पृक्॥दिनत्रयमृतेइतिस्कांदानुसारा
त्॥दिनत्रयमृतेइत्यादिवचनत्रयंविद्धन्यूनायामुपवासेमानं॥साम्येपिसेवोपोष्या॥एकादशीनलभ्येतसक

नाद्वादशी भवेत्॥ उपोष्या दशमीविद्धा ऋषिरुद्दालकोऽब्रवीत्॥ २॥ इत्यादिकूर्म्मपुराणादिवचनेभ्यः॥ अविद्धानि
निविद्धैस्त्वेतन्नस्यंते दिनानि तु॥ मुहूर्तैः॥ पंचभिर्विद्धा॥ ग्राह्यैवैकादशीतिथिरिति कूर्म्मपुराणवचनात्॥ अत्र
मुहूर्तपंचकमरुणोदयमारभ्य बोध्यं॥ अन्यथा परत्रैकादश्या अवश्यंभावेनाऽविद्धाऽलाभाभावात्॥ इमानि वा
क्यानि॥ पुत्रवद्गृहस्थातिरिक्तविषयाणि॥ सपुत्रगृहिणां तु उत्तरत्रोपवासः॥ एकादशीदिनक्षये उपवासं करोति यः॥
तस्य पुत्रा विनश्यंति मघायां पिंडदो यथा॥ एतदेकवाक्यतयैव॥ एकादश्यां यदा वृद्धिर्दिनक्षयतिथिर्भवेत्॥ अत्रो
पोष्या द्वादशी स्यात्त्रयोदश्यां तु पारणमित्यादिवाक्यान्यपि सपुत्रगृहिविषयाणि॥ सपुत्रगृहिकृत दशमीवेधनि
षेधसहचरितद्वादशीव्रतबोधकानि॥ दिनक्षये तु संप्राप्ते उपोष्या द्वादशी भवेत्॥ दशमीशेषसंयुक्तां न कुर्वी
त कदाचनेत्यादिकूर्म्मपुराणादिवाक्यानि वैतादृशविषयाणि॥ पुत्रवद्गृहिणामप्युत्तरत्रोपवासो न्यूनत्वरूप
क्षये एव बोध्यः॥ न तु साम्यरूपे॥ तथा हेमाद्रौ भविष्ये॥ एकादशी कलाप्येका परतो न च वर्द्धते॥ गृहिभिः पुत्र
वद्भिश्च सैवोपोष्या तदा तिथिरिति पूर्वत्रोपवासविधिः संगच्छते॥ परतो वृद्ध्यभावोक्तेः साम्ये तात्पर्यात्॥ अतए ४२
ववाक्यांतरेण न विरोधः॥ मुमुक्षूणां तु साम्येऽपरैव॥ दशमीमिश्रिता पूर्वा पूर्णा तु द्वादशी परा॥ एकादश्यां महा

प्राप्त उपवासः कथं भवेत्॥ इत्युपक्रम्य॥ अद्यैव द्वादशी राजन्॥ उपोष्या मोक्षकांक्षिभिरिति॥ शिवरहस्ये
॥ तथाभिधानात्॥ पराह्णस्यपूर्वोह्ने रात्रावपि विशाद्धमर्थः॥ सामर्थ्यात्॥ पारणादिने देवमभ्यर्च्य घीभुत्वा निवे-
दने मंत्रः पठितव्यः॥ अज्ञानतिमिरांधस्य व्रतेनानेन केशव॥ प्रसीद संमुखो भाव ज्ञानदृष्टिप्रदो भवेति॥ एत-
च्च्यासवचनं॥ श्रौवैस्तग्राङ्कुरैर्नूहः कार्यः॥ तच्च पारणं॥ यदा पारणादिने द्वादशी भोजनापर्याप्ता तदा द्वा-
कालीनमेककलं कृत्स्नमरुणोदये कृत्वा द्वादशीमध्य एव कर्तव्यं॥ तथा च स्कंदपुराणे॥ कलाद्वयं त्रयं वापि द्वा-
दशी यत्र दृश्यते स्नानार्चनादिकं कर्म तदा रात्रौ विधीयते इति रात्रावित्युक्तेऽप्यरुणोदय एव कार्यं॥ तथा च ना-
रदीये॥ अल्पायामथवा विप्रेंद्र द्वादश्यामरुणोदये॥ स्नानार्चनक्रियाः कार्या जपहोमादिसंयुता इति पद्मपुरा-
णेपि॥ यदा भवति चाल्पा तु द्वादशी पारणादिने॥ उषःकाले द्वयं कुर्यात्॥ प्रातर्माध्याह्निकं तदेति॥ अस्य चाव-
रूपकमरुणोदयाधिककालसाध्यं तेन तद्दिनसंख्यादिसंकोचेनाप्यावश्यकं कृत्वा द्वादशीमध्ये पारणं कर्तव्यं
॥ महाहानिकरी ह्येषा द्वादशी लंघिता नरैः॥ करोति धर्महरणमस्नातेव सरस्वतीति पद्मपुराणे॥ द्वादशीलंघने-
दोषश्रवणात्॥ अस्नातेत्यधिकरणे क्तप्रत्ययः॥ तेन तस्यां स्नानमकृत्वा लंघिता सरस्वती यथा धर्मं हरति त

याः भोजनेन लंघिता द्वादशी सर्वार्थः ॥ तेन मध्यंतरे तीर्थस्नानं ॥ सरस्वत्यां तु स्नात्वो त्तरणमिति स्मृतिं ॥ यद्वा वुभुक्ष
तिथिनिमित्तकं ॥ गजच्छायावा सत्पाद्यतन्मध्ये गनिमित्तकं श्राद्धं स्नानादिकं त्रयोदश्यां पाके तत्त्वं भवति ॥
संक्रांतरे श्राद्धापत्यं ॥ तदाः त्वष्टाद्श्रीमध्ये द्भिः पारणं कृत्वा पश्चात् श्राद्धादिविधाय भोक्तव्यं ॥ यदाह देवलः ॥
४४ संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं ॥ अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तेन दोषकृदिति ॥ अत्र चाद्भिः ॥ पारणमा
त्रं विधीयते ॥ श्राद्धाद्यनपकर्षस्तु वचनाभावादेव सिद्धः ॥ माध्याह्निकापकर्षस्तु अपरस्यामपि द्वादश्यां भवत्ये
व ॥ सर्वेषामुपवासानां प्रातरेव हि पारणे ति माधवोक्तवचनात् ॥ भोजनमाध्याह्निकयोश्चबाधनिकर्षो वा
पर्यसद्भावात् ॥ यदा तु प्रातःकाले द्वादशी प्रथमपादव्यापिनी भवति ॥ तदा तमतिलंघ्यैव पारणं कर्तव्यं ॥ द्वादश्याः
प्रथमः पादो हरिवासरसंज्ञितः ॥ तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः इति विष्णुधर्मोत्तरात् ॥ एतेषां च द
शम्यादिनियमानामंगभूतानां लोपे प्रायश्चित्तं ग्रंथांतरादृष्टव्यं ॥ विस्तरभयादिहास्माभिर्न लिख्यते ॥ ॥
इति श्रीमत्स्वामिसदानंदविरचिते शैवसुधाकरे एकादशीव्रतनिरूपणं नाम द्वाविंशः किरणः ॥ २२ ॥ अथ प्र ४
दोषव्रतं ॥ ब्रह्मोत्तरखंडे ॥ पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा ॥ इत्युपक्रम्य धर्मगुप्तेतिहासमुपवर्ण्य ॥

एवमन्येसमाराध्यप्रदोषेगिरिजापतिं॥ जनंतेभीप्सितान्कामान्देहांतेतुपरांगतिं॥ तथा॥ एतस्मात्कारणात्तुल्यंप्रदोषे
गिरिशार्चनं॥ धर्मार्थकाममोक्षाणांयदेतत्साधनंपरं॥ अत्रत्रयोदशीप्रदोषव्यापिनीग्राह्या॥ ततस्कंदे॥ हितेभा
नौस्नात्वासनियमोव्रती॥ पूजास्थानंततोगत्वाप्रदोषेशिवमर्चयेत्॥ इतिस्कंदपुराणोक्तव्रतविधौ॥ प्रदोषस्य
शिवपूजनकालत्वोक्तेः॥ पूजाव्रतेषुसर्वत्रतत्कालव्यापिनीतिथिरितिनियमात्॥ तत्रपूर्वेद्युरेवान्यतरदिनेप्र
दोषव्याप्तौतत्स्पर्शेवासैवग्राह्या॥ दिनद्वयेप्रदोषव्याप्तौ॥ साम्येनतदेकदेशस्पर्शेवाउत्तरा॥ प्रातःसंकल्पये
द्विद्वानुपवासव्रतादिकमित्युक्तसंकल्पकालमारभ्यसत्वात्॥ वैषम्येणतदेकदेशस्पर्शेतदाधिक्यवतीपूर्वा
पिग्राह्या॥ यद्दिनेप्रदोषेपूजाभोजनपर्याप्तंतदाधिक्यंस्यात्॥ नोचेत्साम्यपक्षवदुत्तरैव॥ सायान्हरूपगौणकालव्या
प्तेरपितत्रलाभात्॥ सायान्हस्यगौणत्वंतत्कालस्यप्रदोषस्पर्शाभावेतत्रनक्तविधानादवगम्यते॥ तथाचस्कंदपु
राणे॥ प्रदोषव्यापिनीनस्यांदिवानक्तंविधीयते॥ आत्मनोद्विगुणाछायामंदीभवतिभास्करे॥ तन्नक्तंनक्तमि-
त्याहुर्ननक्तंनिशिभोजनं॥ एवंज्ञात्वाततोविद्वान्सायान्हेतुभुजिक्रियां॥ कुर्यान्नक्तव्रतीनक्तफलंभवतिनिश्चितं तथा मु
हूर्तोनंदिनंनक्तंप्रवदंतिमनीषिणः॥ नक्षत्रदर्शनान्नक्तमहंमन्येगणाधिप॥ इति॥ भविष्यपुराणेपि॥ नक्ष

सुः चतुर्दशीनो ह्निकालस्य अहं मन्ये इत्युक्त्वा मुख्यत्वं॥ पूर्वाह्णीकस्य च गौणत्वमवगम्यते॥ दिनं नक्तं न कर्त्तव्यं तयोरप्य-
निस्पर्थः॥ न च चतुर्दशीमादित्यव्रत ऊर्ध्वमित्यथाहारः॥ प्राप्नोति स्पष्टलोपनिमित्ताचापंचमी॥ अस्तमयादिहृद्ये
५ पिप्रदोषस्य शोभा वेष्टुतरेव॥ संकल्पकालव्याप्तिश्च॥ न चात्रैकभक्तादिवन्मुख्यकालेऽनुष्ठानं॥ किंतु गौणका
लएव॥ सायाह्ने तु भुजिक्रियामिति वचनात्॥ तत्पूर्वस्य च पूजादेरप्यपकर्षेण तत्रैव कर्त्तव्यत्वात्॥ प्रदोषका
लश्च॥ त्रिमुहूर्त्तं प्रदोषः स्याद्भानावस्तंगते सतीत्युक्तो बोध्यः॥ अत्रत्य पूजादिप्रकारः शेषं सर्वं देवसमाध्यायेद्र
ष्टव्यः॥ ॥ इति श्रीमत्स्वामिसदानंदविरचिते शैवसुधाकरे प्रदोषव्रतनिरूपणं नाम त्रयोविंशः किरणः॥ २३
॥ ॥ अथ शनिप्रदोषसोमप्रदोषसोमवारव्रतानि॥ तत्र तावत्स्कांदे॥ ब्रह्मादिदैत्येतरेषां देवानां भयोपतो बृ
हस्पतिः श्रीशिवाराधनस्यैव तन्निवारकत्वेनोपदिष्टः॥ गुरोर्केन विधानेन कीदृशो नव्रतेन वा॥ आराधनीयो गौरी
शोऽस्माभिर्जयकांक्षिभिः॥ तद्वदस्व कराचार्य त्वं हिनः परमा गतिरिति देवानां प्रश्ने वक्तारिते बृहस्पतिश्चाकं प्र
॥ कार्त्तिकादिषु मासेषु मंदवारे त्रयोदशी॥ विशेषाद्धनुः कृष्णपक्षे तु सर्वकामकरी शुभा॥ तस्यां प्रदोषसमये लिंगरूपी ४५
सदाशिवः॥ पूजनीयो हि देवेंद्र सर्वकामसमृद्धये॥ इत्युक्त्वा नाथ तान्स्नानादिकमुक्त्वाग्रमाह हि स्थितं लिंगं प्र॥

माच्छतगुणं स्मृतं॥ वाप्याच्छतगुणं पुण्यमरण्यस्य च पूजने॥ वन्याच्छतगुणं श्रीशैलिंगे वै पर्वतस्थिते॥ पार्वताच्छतगु
णं तपोवनसमाश्रिते॥ काश्यादिसंस्थिते लिंगे पूजितं स्यादनंतकं॥ इति लिंगविशेषेफलविशेषमुक्का शिव
पूजनादिप्रकारं चोक्ता॥ एवं यः कुरुते मर्त्यः प्रदोषव्रतमुत्तमं॥ शनिवारेण संयुक्तं सोद्यापनविधिं नरः॥ आयुरा
रोग्यमैश्वर्यं पुत्रपौत्रमनंतकं॥ प्राप्नोति जयते नित्यं प्रसादात् शंकरस्य च॥ तस्मात्त्वमपि देवेंद्र पूजयस्व सदाशिवं॥
शनिप्रदोषविधिना प्रवक्ष्ये तत्र विजेष्यसि॥ एवं निशम्य गुरुणा कथितं तदानीं॥ सिद्धोपितेन विधिना गिरिशं प्रपूज्य
॥ लोकं प्रसन्नमिव दैत्यपतिं प्रवृद्धं तं तत्क्षणाद्गमयत्॥ तदप्युक्तं॥ ब्रह्मोत्तरखंडे॥ शिवपूजा सदा लोके हेतुः॥
स्वर्गापवर्गयोः॥ सोमवारे विशेषेण प्रदोषादिगुणान्विते॥ १॥ प्रदोषः त्रयोदशी संबंधरूपः॥ इदं सोमप्रदोषमा
हात्म्य॥ परं॥ केवलेनापि ये कुर्युः॥ सोमवारे शिवार्चनं॥ न तेषां विद्यते किंचिदिहामुत्र च दुर्लभं॥ २॥ केवल्य
मुक्तप्रदोषराहित्यं॥ उपोषितः शुचिर्भूत्वा सोमवारे जितेंद्रियः॥ वैदिकैर्लौकिकैर्वापि विधिवत्पूजयेच्छि
वं॥ ३॥ ब्रह्मचारी गृहस्थो वा कन्या वापि सभर्तृका॥ विभर्तृका वा संपूज्य लभते वरमीप्सितं॥ इति तत्रैव॥ सो
मवारे शिवं गौरीं पूजयस्व समाहिता॥ उपोषिता वा सुश्रोणि ताविरजांबरधारिणी॥ १॥ यतवाक् निश्चलमतिः

पूजांकृत्वायथोचितां॥ ब्राह्मणान्भोजयित्वाथशिवंसम्यक्प्रसादयदित्युक्त्वा॥ अभिषेकधीतपूजादीनांघा
पत्यसाम्राज्यादिफलकत्वमुक्त्वा॥ सोमेनसर्वकोशानांसमृद्धिरुपजायते॥ सर्वेषामेवदेवानांतुष्टिःसंयमभो
जनात्॥ २॥ इत्यभाराधयत्॥ शिवंसोमवारेशिवामपि॥ संयमभोजनंदिवाअभुक्त्वाप्रदोषेशिवंसंपूज्यभोजन
मिति॥ येसोमवारेस्वेकंहिदिवाकुर्वंतिभोजनं॥ तान्पातयंतुनरकेघोरेपुत्रफलतः॥ इतिशिवरहस्ये॥ करणे
दोषश्रवणात्तथा॥ निश्चयत्वेनकर्तव्यं॥ भोजनंसोमवारे॥ उपोषणादिनान्यस्मिन्दिवसेनियमोत्स्ययं॥ इ
त्यादिश्रुतश्चैवफलादिपदश्रवणाच्चनित्यमिदं॥ ॥ इतिश्रीमत्स्वामिसदानंदविरचितेशैवसुधाकरेसो
मवारव्रतनिरूपणंनामचतुर्विंशः॥ २४॥ ॥ अथश्रीशिवरात्रिः॥ साचकृष्णादिमासरीत्याफा
ल्गुनकृष्णचतुर्दशी॥ शुक्लादिरीत्यातुमाघकृष्णचतुर्दशी॥ अत्रचंद्रामोलिंगमाविर्भूतमितीशानसंहि
तायामुक्तं॥ तथाहि॥ माघकृष्णचतुर्दश्यामादिदेवोमहानिशि॥ शिवलिंगतयोद्भूतःकोटिसूर्यसमप्रभः॥ इ
तिपुराणांतरेतु॥ तस्मिन्दिनेसमुद्रान्निःसृतंविषंपीत्वाजीवोद्धारप्रयोजकप्रतमाविभ्रिकीर्षुः॥ श्रीशिवो ४५
विषपानजातसंतापजीवानुकारीसंविवेशनदोपोषितैर्देवैर्निशिजागरणिकृतुयामंजलप्रसेकादिनाप्रा

मितः॥ ततस्तेभ्यो जगाद स्मास्यां निश्येवं सदोपोष्य जाग्रद्भिः सर्वैरहमर्च्यस्तेन रसर्वार्थसिद्धिर्न विघ्नति नो
चेन्महाहानिः स्यादिति स्थितं॥ स्कांदे तु॥ मार्गशीर्षे समुद्भूतं लिंगं देवैरस्यां रात्राववर्चितमिति स्थितम्॥ अ
त्र कल्पभेदेन व्यवस्था बोध्या॥ शिवरहस्ये॥ तस्मात्सूर्यस्य च देवर्षे माघकृष्णचतुर्दशी॥ शिवरात्रिः समा-
ख्याता त्रिये यं त्रिपुरद्विषः॥ इति॥ माघग्रहणममांतमासेन॥ स्कांदे पि॥ माघफाल्गुनयोर्मध्ये असिताया
चतुर्दशी॥ शिवरात्रिस्तु साख्याता सर्वयज्ञोत्तमोत्तमेति॥ शिवरात्रिव्रतं चोपवासपूजाजागरणरूपप्रधा
नत्रयसमुदायरूपं॥ उपवासप्रभावेन बलादपि च जागरात्॥ शिवरात्रेस्तथा तस्यां लिंगस्यापि च पूजया॥
अक्षयाल्लभते भोगान् शिवसायुज्यमाप्नुयादिति॥ नागरखंडे॥ त्रयाणामविकलसंबंधात्॥ क्वचिदुप
वासमात्रश्रवणं त्वितरयोरप्युपलक्षणं॥ क्वचित्तु अशक्तं प्रत्यनुकल्पत्वेनैकस्य द्वयोर्वा श्रवणं॥ अथवा
शिवरात्रिं च पूजाजागरणैर्नयेत्॥ कश्चित्पुण्यविशेषेण व्रतहीनोपि यः पुमान्॥ जागरं कुरुते तत्र स रुद्रसम
तां व्रजेदित्यादिषु॥ अथवा आदिशब्दश्रवणात्॥ अत्र चतुर्दशी॥ अर्धरात्रव्यापिनी ग्राह्या॥ तथा च नारदीये
॥ माघमासस्य चतुर्दश्यामादिदेवो महानिशि॥ शिवलिंगात्समुद्भूतः कोटिसूर्यसमप्रभः॥ तत्कालव्यापिनी ग्राह्या

शिवरात्रिव्रते तिथिरिति ॥ तत्र परेद्युरेव निशीथव्याप्तौ दिनद्वये वा निशीथव्याप्तौ परैव ॥ पूर्वेद्युः परेद्युर्वा महा
निशि चतुर्दशी ॥ व्याप्ता सा दृश्यते यस्यां तस्यां कुर्याद्व्रतं नर इति कल्पतरूदाहृतवचनात् ॥ माघासिते भूतदिनं हि
राजन्नुपैति योगं यदि पञ्चदश्या ॥ तया युक्तां न तु तां व्रतकुर्याच्छिवस्य रात्रिं प्रियकृच्छिवस्येति हेमाद्र्युदाहृतव
वनात् ॥ जययात्र योगस्यात्र कर्मण्युक्तामिमुक्तत्वात् ॥ पूर्वेद्युरुभयोरव्याप्तावुत्तरा ॥ व्याप्तिप्रतीतिः ॥ यातु पूर्वे
द्युरेव निशीथयोगिनी दिनद्वये पि वा निशीथयोगिनी सा पूर्वैव ॥ तदुक्तं ॥ स्कान्दे ॥ कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रि
चतुर्दशी ॥ एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥ तथा ॥ जयन्ती शिवरात्रिश्च कार्ये भद्राजयान्विते ॥ तथा
॥ माघफाल्गुनयोर्मध्ये यासाच्छिवचतुर्दशी ॥ अनङ्गेन समायुक्ता कर्तव्या सा सदा तिथिरिति ॥ ननु पूर्वेद्युरेव नि
शीथयोगिनी तत्कालयोगात्पूर्वेति विवक्षितवचनेभ्यश्च पूर्वैवेत्युक्तं ॥ दिनद्वये तद्योगिनी तु परेद्युर्योगिनी तु परेद्युः ॥
प्रदोषनिशीथोभयव्याप्तिलाभात्संकल्पकालमारभ्य सत्त्वादहोरात्रोभययोगाच्च परैव युक्ता ॥ न तु पूर्वा ॥ अत एव ॥
माधवेनापि निशीथव्यापिनी पूर्वैव ग्राह्येत्युक्तं ॥ तिथितत्त्वेप्येवमेव ॥ ननु कथं पूर्वेद्युरेवास्त्वत इति चेत् ॥ उच्यते ॥ ८७
अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् ॥ पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति पद्मपुराणवचनमीदृशा

एवंविषये पूर्वविद्धाविधानार्थं॥ अंततः सर्वाण्यपि पूर्वविद्धाविधायकानि प्रागुक्तानि वाक्यानि॥ महतामपि
पापानां दृष्टा वै निष्कृतिः पुरा॥ न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवामिति स्कंदपुराणे अमावास्यायुतानिषेधश्चैतादृश
विषय एव सार्थकः॥ पूर्वस्या एव निशीथयोगे॥ पूर्वाह्ण एव माघकृष्णस्य चतुर्दश्यामिति॥ पूर्वोदाहृतनारदी
यवचनेन पूर्वेद्युः परेद्युश्च वेति प्रागुक्तकमरत्नावल्युदाहृतवचनेन च सिद्धत्वात्॥ एवं सति तत्र पूर्वोक्तवचनाना
मानर्थक्यात् तानि दिनद्वये निशीथव्याप्तिन्याः॥ पूर्वस्याः प्राशस्त्यं प्रतिपादयंति॥ किंच॥ अर्धरात्रात्परस्ताच्चेदिति
वचने पूर्वविद्धैवेत्येवकारादुत्तरविद्धानिवर्तकादुत्तरविधायाः प्रसक्तिर्गम्यते॥ सा चोभयत्र निशीथयोगे एव सं
भवति॥ न तु पूर्वत्रैव निशीथयोगे॥ तस्मादुभयत्र निशीथयोगेप्यपि पूर्वैवेति॥ स्कंदपुराणे॥ आदौ मार्गशिरेमा
सि शैवोत्सवदिनेपि वा॥ [illegible]यान्माघमासे वा द्वादशैव समुपोषयेत्॥ द्वित्यादिवचनैः प्रतिमासकृष्णचतुर्दशीषु॥ उ
पवासजागरणात्मकं काम्यं शिवरात्रिव्रतं विहितं॥ तत्रापि रात्रौ प्रतियामं पूजाजागरणस्य च विधानात्सक
लरात्रिसाध्यत्वात् बहुरात्रिव्यापिनी तत्र ग्राह्या॥ दिनद्वये रात्रिसाम्ये॥ पूर्वा॥ रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी ति
थिरिति ह्युत्तरस्या वर्जनात्॥ येषां प्रदोषव्याप्तिरपि निर्णायिका॥ तेषां मते उत्तरेति स्कंदपुराणे॥ माघकृष्णचतुर्दश्यां

रविवारो यदा भवेत्॥ भौमो वाथ भवेद्देवि कर्त्तव्यं व्रतमुत्तमं॥ शिवयोगस्य योगेतु तद्भवेदुत्तमोत्तममिति॥ तथाच
॥ त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी॥ अंते चैव सिनीवाली त्रिस्पृशां शिवमर्चयेदिति॥ पारणं चात्र स्कंद
पुराणे एवं तिथ्यंते तिथिमध्ये च विहितं॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्दशी एताः पूर्वयुताः कार्यास्तिथ्यं
ते पारणं भवेदिति॥ उपोषणं चतुर्दश्यां चतुर्दश्यां च पारणं॥ कृतैः॥ सुकृतलक्षैश्च लभ्यते वाथवा न वेति॥ त
त्र॥ सा त्वस्तमयपर्यंतव्यापिनी चेत्परेहनि॥ दिवैव पारणं कुर्यात्पारणान्नास्ति दोषभागिति शिवरात्रिव्रतकर
णपद्धतिकारा नारदसंहितोक्तवचनात्तिथ्यंतव्रतीत्यस्य दिवापारणस्य कर्त्तुंशक्यत्वे तिथ्यंते॥ नोचेत्तिथि
मध्ये एवेति व्यवस्था॥ इदं व्रतं संयोगपृथक्त्वन्यायेन नित्यं काम्यं च॥ तथाच॥ माधवीये॥ स्कांदे॥ परात्प
रतरं नास्ति शिवरात्रिं परात्परं॥ न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरं॥ जंतुर्जन्मसहस्रेषु भ्रमते नात्र संशय
इति॥ अकरणे प्रत्यवायश्रुतेः॥ वर्षे वर्षे महादेवि नरो नारी पतिव्रता॥ शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूज
येदिति वीप्साश्रुतेः॥ अर्णवो यदि वा शुष्येत् क्षीयते॥ हिमवानपि॥ चलंत्येते कदाचिद्धि निश्चलं हि शिवव्रतमि
ति वचनाच्च नित्यता॥ यमनियमस्थितो देवि शिवरात्रिमुपोषकः॥ गणत्वमक्षयं दिव्यमक्षयं शिवशासनं॥ सर्व

न भुक्त्वा महाभोगान् ततो मोक्षमवाप्नुयादिति स्कांदात्॥ द्वादश्याह्निकमेतस्याश्चतुर्विंशाह्निकं तु वै॥ तत्रैवेशानसंहि-
तावचनात्॥ काम्यता॥ तत्रैव॥ शिवरात्रिव्रतं नाम सर्वपापप्रणाशनं॥ आचंडालमनुष्याणां भुक्तिमुक्तिप्रदायकं॥ अथ
मत्रसंक्षेपतः शिवरात्रिव्रतानुष्ठानप्रकारः॥ धृतत्रिपुंड्ररुद्राक्षस्तिथ्याद्युल्लिख्य शिवप्रीतिकामः॥ शिवरात्रिव्रतं
ह्येतत्करिष्येऽहं महाफलं॥ निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते॥ चतुर्दश्यां निराहारो भूत्वा शंभो परेऽहनि॥ भोक्ष्ये
ऽहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वरेति पठित्वा जलमुत्सृजेत्॥ ततो नित्यकृत्यं विधाय रात्रौ प्रथमप्रहरे शिवपू-
जां करिष्य इति संकल्प्य॥ पूर्वप्रतिष्ठिते लिंगेऽप्रतिष्ठिते वा तद्देवप्राणप्रतिष्ठां कृत्वा वक्ष्यमाणपार्थिवलिंगे स्वज्ञो-
प्रकारेण पंचाक्षरेण वैदिकेन वा पौराणमंत्रैर्वा प्रणवादिचतुर्थ्यंतनमोंतशिवनाम्ना वावाहनाद्युपचारैः पूजयेत्
॥तत्र विशेषः॥ ॐ ह्रीं ईशानाय नमः॥ इति प्रथमप्रहरे दुग्धेन स्नपनं॥ शिवरात्रिव्रतं देवपूजाजपपरायणः॥ करो-
मि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर॥ इत्यर्घ्यदानं॥ ततस्तन्मंत्रजपेन तत्कथाश्रवणादिभिर्वा जागरणं॥ तद्ध्यानं तज्जपः
स्नानं तत्कथाश्रवणादिकं॥ उपवासकृतां ह्येते गुणाः प्रोक्ता मनीषिभिरिति वचनात्॥ द्वितीयप्रहरे॥ ॐ ह्रीं अघोरा-
य नम इति दध्ना स्नपनं॥ नमः शिवाय शांताय सर्वपापहराय च॥ शिवरात्रौ ददाम्यर्घ्यं प्रसीद उमया सह इति चार्घ्यदा-

नं॥ तृतीयप्रहरे॥ ॐ ह्रौं वामदेवाय नम इति घृतेन स्नपनं॥ दुःखदारिद्र्यशोकेन दग्धोहं पार्वतीपते॥ शिवरात्रौ ददाम्यर्घ्यमु-
माकांत गृहाणमेद्य सर्घ्यषानं॥ चतुर्थे॥ ॐ ह्रौं सद्योजाताय नम इति मधुना स्नपनं॥ एवं मूलमंत्रजपादिना रात्रिमतिवा-
ह्य प्रभाते॥ अविघ्नेन व्रतं देव त्वत्प्रसादात्समापितं॥ क्षमस्व जगतां नाथ त्रैलोक्याधिपते हर॥ यन्मयाद्यकृतं पु-
ण्यं तद्रुद्रस्य निवेदितं॥ त्वत्प्रसादान्महादेव व्रतमद्य समर्पितं॥ प्रसीदो भव मे श्रीमन्सद्गतिः॥ प्रतिपाद्यतां॥ त्वदालो-
कनमात्रेण पवित्रोस्मि न संशयः॥ इति व्रतं समर्पयेत॥ परदिने यथाशक्ति ब्राह्मणान्भोजयित्वा॥ संसारक्लेशदग्ध-
स्य व्रतेनानेन शंकर॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भवेति संप्रार्थ्य॥ बंधुभिः॥ सह पारणं कुर्यादिति॥ सच्छा-
स्त्राब्धिभवो भवं प्रभजतां सौख्याबुधेर्वर्धकः॥ श्रीमच्छैवविरोधिदुर्जनमहाचिंताब्धिवृद्धिप्रदः॥ संसारोत्थवणाता-
पहृत्कृतिविदां विश्लिष्टसद्बीप्रियो भद्रीनानामतितापकत्तमसततं विद्व चकोरप्रियः॥ २॥ श्रौतस्तेन समीहितार्थद-
नमास्रैषधीगोचरः सततक्लौमुदकुड्मलस्फुरणकृत बुधीनमो ब्रापकृत॥ हृतखेदौवसुधाकरो यमुद्दियादीश्व-
रप्रियाणां सदा॥ तद्वाक्यैः परिनिःसृतैः सुकीरणैर्हृद्धत्मोहं तमः॥ ३॥ अज्ञपापकरणे न दापहृदयोः कदनं नदन्तु कणि-
रहकष्टयोः॥ कर्महस्तपुरशिक्षितशिक्षयोर्वा त्यागहृजपरोन्नतेहृयोः॥ ४॥ ज्ञाननाशमतमप्यवादयो॥ हैतवा

॥ श्रीगणेशाय नमः ॥ ॥ तपोयज्ञदानादिभिः शुद्धबुद्धिर्विरक्तो नृपादौ पदे तुच्छबुद्ध्या ॥ परित्यज्य सर्वं यदाप्नो-
ति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ १ ॥ दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य मत्या विचार्य स्वरूपम् ॥ यदा-
प्नोति तत्त्वं निदिध्यास्य विद्वान् परं ॥ २ ॥ यदानन्दरूपं प्रकाशस्वरूपं निरस्तप्रपंचं परिच्छेदशून्यं ॥ अहं ब्रह्मवृ-
त्त्यैकगम्यं तुरीयं परं ॥ ३ ॥ यदाज्ञानतो भाति विश्वं समस्तं विनष्टं च सद्यो यदात्मप्रबोधे ॥ मनोवागतीतं विशु-
द्धं विमुक्तं परं ॥ ४ ॥ निषेधे कृते नेति नेतीति वाक्यैः समाधिस्थितानां यदाभाति पूर्णं ॥ अवस्थात्रयातीतम-
द्वैतमेकं परं ॥ ५ ॥ यदानन्दलेशैः समानन्दि विश्वं यदाभाति सत्त्वे तदाभाति सर्वं ॥ यदालोचने हेयमन्यत्समस्तं प-
रं ॥ ६ ॥ अनन्तं विभुं सर्वयोनिं निरीहं शिवं संगहीनं यदोंकारगम्यं ॥ निराकारमत्युज्ज्वलं मृत्युहीनं परं ॥ ७
॥ यदानन्दसिंधौ निमग्नः पुमान्स्यादविद्याविलासः समस्तप्रपंचः ॥ तदा न स्फुरत्यद्भुतं यन्निमित्तं परं ॥ ८ ॥
स्वरूपानुसंधानरूपां स्तुतिं यः पठेदादराद्भक्तिभावो मनुष्यः ॥ शृणोतीह वा नित्यमुद्युक्तचित्तो भवेद्विष्णुरत्रैव वेदप्रमा-
णात् परं ॥ ९ ॥ न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः ॥ अनैकान्तिकत्वात्सुषुप्त्येकसिद्धस्तदेकोऽवशि-
ष्टः शिवः केवलोऽहं ॥ न वर्णाश्रमाचारधर्मा न मे धारणाध्यानयोगादयोऽपि ॥ अनात्माश्रयोऽहंममाध्या-


व·

सहानात्तदेकोवशिष्टः शिवः केवलोहं ॥२॥ नमातापितावानदेवानलोकानवेदानयज्ञानतीर्थंब्रुवन्ति ॥ सुषुप्तौनिरस्ता
तिशून्यात्मकत्वात्सदेकोवशिष्टः ॥३॥ नसांख्यंनशैवंनतत्पाञ्चरात्रंनजैनंनमीमांसकादेर्मतंवा ॥ विशिष्टानुभूत्याविशुद्धा
त्मकत्वात्सदेकोवशिष्टः ॥४॥ नशुक्लंनकृष्णंनरक्तंनपीतंनकुब्जंनपीनंनह्रस्वंनदीर्घं ॥ अरूपंतथाज्योतिराकारक
त्वात्सदेकोवशिष्टः ॥५॥ नचोर्ध्वंनचाधोनचान्तर्नबाह्यंनमध्यंनतिर्यङ्नपूर्वापरादिक् ॥ वियद्व्यापकत्वादखण्डैक
रूपस्तदेकोवशिष्टः ॥६॥ नशास्त्रंनशिष्योनशिक्षानचत्वंनचाहंनचायंप्रपञ्चः ॥ स्वरूपावबोधोविकल्पासहिष्णुस्त
देकोवशिष्टः ॥७॥ नजाग्रन्नमेस्वप्नकोवासुषुप्तिर्नविश्वोनवातैजसःप्राज्ञकोवा ॥ अविद्यात्मकत्वात्त्रयाणांतुरीय
स्तदेकोवशिष्टः ॥ ८ ॥ अपिव्यापकत्वाद्धितत्वप्रयोगात्स्वतःसिद्धभावादनन्याश्रयत्वात् ॥ जगत्तुच्छमेतत्समस्तंतद
न्यत्तदेकोवशिष्टः ॥ ९ ॥ नचैकंतदन्यद्द्वितीयंकुतःस्यान्नवाकेवलत्वंनचाकेवलत्वं ॥ नशून्यंनचाशून्यमद्वै
तकत्वात्कथंसर्ववेदान्तसिद्धंब्रवीमि ॥ १० ॥ इतिश्रीमच्छंकराचार्यविरचितंसिद्धान्तबिंदुस्तोत्रंसमाप्तम् ॥
प्रशान्तचित्तायजितेन्द्रियायप्रक्षीणदोषाययथोक्तकारिणे ॥ गुणान्विताय... परात्मचेतोऽस्तिनिवेशितायनमोऽस्तुतेज्ञानप्रदाये
निरन्तरं ॥ ॥

दक्षिणदुग्धमादयोः॥ तत्त्वलक्ष्यकुमवादसाक्ष्योः॥ शंकरस्य नतिरस्तु पादयोः॥४॥ सदानन्दगिरिर्भिक्षुः श्रीमद्वै
वसुधाकरं॥ कृत्वाऽर्पियम्महेशाय श्रीकलिंगस्वरूपिणे॥५॥ लक्ष्मणं ध्यात्वा ब्रह्मयोधनदस्सदानंदनन्दनवनंतरणायेदं का
कं विधिमपि श्रुराकं॥ क्षितिपतिं॥ नमन्यंते मस्काद्दहतदवस्रष्टे क्षितिपतिः॥ स्वरूपोल्लक्षेमंस्मरतिसततंतोसुखक
रो॥ द्वारसेन्दुनंदभूवर्षे विक्रमादित्यभूपतेः॥ पूर्णोयं कार्तिके शुक्ले त्रयोदश्यां सुसंग्रहः॥७॥ ॥इति श्रीमन्महा
महेन्द्रमहाराणा श्रीस्वरूपसिंहप्रेरितश्रीमत्परमहंसपरिव्राजकाचार्य श्रीसदानन्दस्वामिविरचिते श्रीमद्वैव
सुधाकरे पञ्चविंशः किरणः॥२५॥ समाप्तश्चायं वसुधाकरः॥ संवत् १९२२॥ शाके १७८७॥ आषाढकृ
ष्णतृतीयायां चंद्रवासरे॥ ॥लिपिकृतं सूर्यदत्तविजैपुरवासिना॥ ग्रामाणायां सुजाणमलशर्मणा॥
लिखापितं ब्रह्मचारीजी श्रीलक्ष्मणानंदजी श्रीपारंपर्यधर्मनिरूपणार्थं॥ श्रीशिवार्पणमस्तु ॥ ॐ ॥
यह पुस्तक मुंबई बंदर में लक्ष्मीनारायण गवडब्राह्मण परशुरामपुर का ने शिलाक्षर में छपाया॥ ब्रह्मचारीजी
श्री लक्ष्मणानंदजी ने पुस्तक छपाया लक्ष्मीनारायण मारफत॥ शुभंमस्तु॥ ॥शुभम्॥ ॐ ॥
॥ श्री ॥ श्री ॥ ॐ ॥ ॐ ॥ श्री ॥ श्री ॥ श्री॥

श्री वीरभद्रशर्मेण स्तैलंगस्य -

॥ ह - श्री शैवसुधाकरग्रंथसमाप्त ॥


ज्ञानमंदिरम्
जंगमवाड़ी मठ काशी

